# नन्दनवनकल्पतरुः

३८



विं०सं० २०७२
उत्तरायणम्

सङ्कलनम् :
कीर्तित्रयी

शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥

# नन्दनवनकल्पतरुः ३८

शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥

वि.सं. २०७३
**उत्तरायणम्**

सङ्कलनम्
**कीर्तित्रयी**

**नन्दनवनकल्पतरुः ३८**

**( षाण्मासिकम् अयनपत्रम् )**

सङ्कलनम् : **कीर्तित्रयी ॥**

प्रकाशनम् : **श्रीजैनग्रन्थप्रकाशनसमितिः**, खंभात ॥

वि.सं. २०७३, ई.सं. २०१७

मूल्यम् : **₹ १००/-**

**अस्मिन् जालपुटेऽपि उपलभ्यते - www.jainelibrary.org**

इ-सङ्केतः : s.samrat2005@gmail.com

प्राप्तिस्थानम् : **( १ ) श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर**
१२, भगतबाग, शेठ आणंदजी कल्याणजी पेढी समीप,
पालडी, अमदावाद - 380007
दूरभाष : 079-26622465, 09408637714

**( २ ) श्रीविजयनेमिसूरिज्ञानशाला**
शासनसम्राट् भवन, त्रीजो माळ, शेठ हठीसिंह केसरीसिंहनी वाडी
दिल्ली दरवाजा बहार, शाहीबाग रोड,
अमदाबाद-३८०००४, फोन- ०९९-२२१६८५५४.

सम्पर्कसूत्रम् : **"विजयशीलचन्द्रसूरिः"**
C/o. Atul H. Kapadia
A-9, Jagruti Flats, Behind Mahavir Tower,
Paldi, Ahmedabad-380007
दूरभाष : 079-26574981, (M) 9979852135

मुद्रणम् : **किरीट ग्राफिक्स**
३, मंगलम एपा. भगवाननगरनो टेकरो, विश्वकुंज, पालडी, अमदावाद-380007
दूरभाष : 09898490091

# वाचकानां प्रतिभावः

नन्दनवनकल्पतरोः सप्तत्रिंशी शाखा पठिता । तत्रत्यं प्रास्ताविकं चिन्तोद्दीपकम् आसीत् । अर्थोपार्जनलक्ष्या शिक्षणव्यवस्था पाठ्यपुस्तकाभ्यासक्रममेव आश्रयति इति यदुक्तं तत्तु साधु एव । सा छात्रान् मौलिकचिन्तकान् न करोति । ''आचार्यो नाम्ना, वणिग् व्यवहारेण, विद्यागमः क्व ?'' इत्येषा कान्तिगोरस्य हाईकुकविता (पृ.सं. ४१) अत्र स्मृतिपथमागता ।

अस्याः सञ्चिकायाः पद्यविभागः अतीव आस्वाद्यः आसीत् - विशिष्य अभिराजमिश्रस्य प्राचां तुष्ट्यै रचितं श्रीशतकमिति नूत्नं काव्यं, श्रीसुरेन्द्रमोहनमिश्रस्य सतीसूक्तषोडशी च । नागराजरावविरचितं 'सुरागकलितं मधुरं प्रसन्नं' च निन्दास्तुतिशतकं पठन्नहं सत्यं मन्त्रमुग्धः अभवम् । कलिसपादिकासु अभिराजराजेन्द्रमिश्रस्य ''जलदन्ति महानसधूमचयाः'' इत्यादयः मौलिकाः प्रयोगाः हृद्याः अनुभूताः । कमलेशकुमारस्य 'जलं हि द्विविधं प्रोक्तम्' अपि चित्रानन्दकरम् । 'केयं कृपा' इति कवितायाः रचयितरि आचार्यभूते डॉ. विश्वासे तेन अप्रार्थितः अपि भगवान् नित्यं कृपां वृष्यात् सुतराम् । मुनिधर्मकीर्तिविजयानां 'पत्रम्' पठित्वा धर्मलाभः अभवत् । अपि च आणन्दजी-कल्याणजी-संस्थायाः किञ्चित् परिचायनमपि साधितम् । मुनिकल्याणकीर्तिविजयानां 'गभीरेषु मर्मसु' 'मार्गः' इत्यस्मिन् पञ्चमे मर्मणि (पृ.सं.७२) आश्रमस्य निकषा इति प्रयोगः मुद्रितः दृष्टः । निकषायोगे द्वितीया इति श्रुतम्, अतः आश्रमं निकषा इति परिवर्त्य पठितम् । तेषामेव मिश्रणनामिकायां व्यङ्ग्यकथायां (पृ.सं.७९) रिचार्डः पण्डितवर्यं वदति, ''भारतस्य संस्कृतिं संस्कृतभाषां च अत्यधिकं प्रीणाम्यहम्'' इति अत्र द्वितीयाभक्ति-प्रयोगात् 'I Satisfy' इत्यर्थः निष्पद्यते किल ? 'I Like' इति अर्थः उद्दिष्टश्चेत् 'संस्कृतभाषायां प्रीणामि' इति सप्तम्यां प्रयोक्तव्यं वेति सन्देहः अपि समजायत । एवमेव एतस्याः शाखायाः मुखपुटे उत्तरायणम् इति, किन्तु अन्तः (प्रथमपुटे) दक्षिणायनम् इति च मुद्रितं दृष्ट्वा चकितः[१] ।

इति भवदीयः विनीतविधेयः

**एम्. ए. रवीन्द्रन्**
**केरलम्**

---

**१. एतत्त्वनवधानेन मुद्रितम् । एतदर्थं क्षमा प्रार्थ्यते । वस्तुतस्तु मुखपुटे दक्षिणायनमित्येव मुद्रयितव्यमासीत् । ( सं. )॥**

# वाचकानां प्रतिभावः

सम्पूज्याः आचार्यचरणाः
मान्या कीर्तित्रयी,

सादरं प्रणतयः ।

> यत्र नन्दनवनं तत्र संस्कारिता
> संस्कृतस्य सेवया संस्कृता परम्परा ।
> संस्कारमूलतस्तत्र भव्य-भद्रता
> भारतीयता वरा भ्राजते हितानुगा ॥

इति विनिवेदयामि ॥

डो. वासुदेवः वि. पाठकः
अहमदाबादतः

# प्रास्ताविकम्

द्वि-त्रासु शाखासु शिक्षणमधिकृत्य किञ्चिद् विचारितम् । इदानीं राष्ट्रीयं चारित्र्यमधिकृत्य किञ्चिद् विचारयामः । अद्यत्वे सर्वत्र नैतिकता-प्रामाणिकता-सौजन्य-सदाचारादिमूल्यानां ह्रासो दृश्यते । यद्यपि बहूनां जनानामेतेषु मूल्येषु श्रद्धा तु वर्तत एव, तथाऽपि प्रायः सर्वत्राऽसन्मूल्यानामाचरणमेवाऽऽधिक्येन वरीवर्ततेऽतः सामान्यजनानां हृदयेऽसदेव सत्त्वेन प्रतिष्ठितं भवति । एतादृशे कालेऽपि बहवो देशास्तादृशा अपि सन्ति यत्र जनाः सन्मूल्यानामेव प्रतिष्ठामाचरणं चाऽद्यत्वेऽपि समाद्रियमाणा दृश्यन्ते । एषु देशेषु केचन पाश्चात्या योरोपीयाश्च देशा यथा मुख्यास्तथैव एशियाखण्डस्याऽपि केचन जपान-कोरियादयो देशा स्वानुशासनवन्तः सदाचरणवन्तश्च सन्ति ।

अथ जपानदेशमधिकृत्य विचारयेम -

बहूनां विकसितानां विकसतां च देशानामपेक्षया जपानदेशोऽतीव लघुपरिमाणकः । तत्रत्या जनसङ्ख्याऽप्यल्पीयसी । द्वितीये विश्वयुद्धे च तत्प्रजाभिर्बह्वी हानिरनुभूता । एवंस्थितेऽपि विश्वस्याऽपि प्रथमेषु पञ्चसु देशेषु तस्य स्थानमस्ति । अत्र किं वा कारणं स्यात् ? जपानदेशीयाः प्रजा आर्थिकक्षेत्रे, विद्याक्षेत्रे, विज्ञानक्षेत्रे, तन्त्रक्षेत्रे, परमाणुशक्तिक्षेत्रे, क्रीडाक्षेत्रे, नूतनाविष्कारक्षेत्रे - एवं सर्वेष्वपि क्षेत्रेषु नितान्तमग्रेसरीभूता वर्तन्ते तत्र किं वा निदानम् ? पश्याम इदानीन्तनान्येव कानिचिदुदाहरणानि ।

पञ्च-षेभ्यो वर्षेभ्यः पूर्वं जपानदेशे समुद्रतटे त्सुनामीतरङ्गाः, देशभूमौ भूकम्पः, आण्विकोर्जाकेन्द्राणां च विभेदनमिति त्रिविधा आपत्तयः सममेव समापतिताः । सहस्रशो जना मृता लक्षशश्च व्रणिताः । अगणितानि भवनानि क्रीडापत्रसद्मानीव भूमिसाज्जातानि । सर्वास्वपीदृशीषु दुर्घटनासु सञ्जातास्वपि कुत्राऽपि जनानां सम्मर्दोऽपधावनं वा न दृष्टिपथमागतम् । सर्वेऽपि धीरतामाश्रित्य सहायकार्यं रक्षणकार्यं वा कुर्वाणा दृश्यन्ते स्म । सर्वत्र स्वार्थं विस्मृत्य परार्थमेव भजमानानां जनानामेवाऽऽधिक्यमासीत् । हेलिकोप्टरयानात् क्षेप्यमाणानि भोजनपुटकानि ग्रहीतुं न कुत्राऽपि जनानामहमहमिका दृष्टा ।

प्रवृद्धमाण्विकं विकिरणं निरोद्धुं शमयितुं च सहस्रशस्तन्त्रज्ञाः स्वभ्यस्ताः कर्मचारिणश्च स्वीयां स्वास्थ्यहानिं प्राणभयं चाऽविगणय्याऽपि दिवानिशं कार्यरता आसन्, अन्येषां जनानां विकिरणादेतस्माद् मा काचिदपि हानिभवत्विति भावनयैव खलु !

सहायकार्ये प्रारब्धे, न कुत्राऽपि जनसम्मर्दोऽहमहमिका हस्ताहस्ति वा दृष्टानि । सर्वेऽपि स्वयमेवा-ऽनुशासनरताः पङ्क्तिस्थिताश्च स्वं स्वं पर्यायमपेक्षमाणाः स्थिता आसन् । कस्यचिदपि पङ्क्तिं भित्त्वाऽग्रे आगन्तुं चातुर्यमेव नास्तीतीव दृश्यते स्म । प्रायः सर्वत्र कार्यालयाः पिहिता एवाऽऽसन् तथाऽपि स्वच्छताकर्मकराः स्वीयं कार्यं निष्ठया कुर्वाणाः सर्वानपि मार्गानुपमार्गान् रथ्याश्च स्वच्छीकुर्वन्ति स्म व्यवस्थां च रक्षन्ति स्म । मार्गेषु यद्यपि जनसम्मर्दो वाहनसम्मर्दश्चाऽल्पीयानेव तथाऽपि जना वाहनचालकाश्च

परिवहनसङ्केतान् (Traffic Signals) यथावदनुसरन्तो नियमांश्चाऽनुपालयन्तो दृश्यन्ते स्म ।

यदा च भूकम्पोऽनुभूतस्तदा ह्येकत्रोपाहारगृहे जना आहारं कुर्वाणा आसन् । भूचालनानन्तरं सर्वे एव ततो बहिरागता आसन् । यावच्च भूकम्पाघाताः शान्ताः सञ्जातास्तावत्तैव सर्वेऽपि ते आहारकर्तारः समागत्य देयं धनं दातुं पङ्क्तिशः स्थिताः !! भूकम्पपीडितक्षेत्रेषु निजनिजस्वजनानन्वेष्टुं गच्छतां जनानां व्यवहारोऽपि निराकुलो भावोद्रेकरहितः परिदेवनादिवियुक्तश्चाऽऽसीत् ।

सामान्यजनाः पत्रकारादयश्च केऽपि सर्वकारेऽधिकारिजनेषु च दोषारोपणं नैव कृतवन्तः । सर्वकारीयाधिकारणोऽपि न कानिचिन्मिथ्याऽऽश्वासनानि मुधा वचनानि वा ददति स्म । न च केऽपि मन्त्रिणो हेलिकोप्टर-यानादिषु समारुह्य भूकम्पपीडितक्षेत्राणामवलोकनं कर्तुं निर्गता दृष्टाः ।

एषा परिस्थितिरस्ति जपानदेशवासिनाम् । इदानीमस्माकं देशे यदि काऽपि प्राकृतिक्यापत्तिः समापतेत् तदा कीदृशी परिस्थितिर्भवेत् - इति विचिन्त्य तस्यास्तुलनां जपानीयपरिस्थित्या सह क्रियेत तदा केवलमेतावदेव वक्तव्यं स्यात् - यद् अस्माकं मस्तकं लज्जाभारेणाऽवनतं जातमिति ।

जपानदेशसदृशं स्वयमनुशासनयुतं नैतिकता-प्रामाणिकता-सदाचारादिगुणसमन्वितं च राष्ट्रीयं चारित्र्यं कथं निष्पन्नं भवेत् ? तदर्थं चोत्तरदायित्वं कस्य ? इति चिन्तितं कदाऽपि !!

**चैत्र शुक्ला प्रतिपत्** **कीर्तित्रयी**

**वि.सं. २०७३, अहमदाबादनगरम्**

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| श्रीमद्ऋषभदेवजिनेश्वरस्तोत्रम् | | १ |
| श्रीमहावीरस्तुतिः | | ३ |
| सकललब्धिनिधान-श्रीगौतमस्वाम्यष्टकम् | आ.विजयहेमचन्द्रसूरिः | ५ |
| श्रीगौतमस्वामिस्तुतिः | आ.विजयहेमचन्द्रसूरिः | ६ |
| महोपाध्यायश्रीमद्यशोविजयगुणस्तुत्यष्टकम् | आ.विजयहेमचन्द्रसूरिः | ७ |
| दीक्षा नाम किम् ? | | ९ |
| सिद्धाचलेश्वरस्तोत्रम् | | १० |
| आस्वादः | | |
| आत्मन्येव सम्पश्याम | मुनिरम्याङ्गरत्नविजयः | १२ |
| जीवनमौक्तिकम् | मुनिरम्याङ्गरत्नविजयः | १४ |
| भारतीयसंस्कृतौ यज्ञो वै श्रेष्ठतमं कर्म | डॉ. रामकिशोर मिश्रः | १६ |
| दर्शनम् | | |
| आर्यसत्यानां पर्यालोचनम् | हिराकुमारी झा | १८ |
| ईशस्य न्यायोपासना | डॉ. रामप्रसाद-पौडेलः | २३ |
| पत्रम् | मुनिधर्मकीर्तिविजयः | ३० |
| ग्रन्थपरिचयः | | |
| अर्धजरती (कथासङ्ग्रहः) | कीर्तित्रयी | ३५ |

| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| अमरकोशः | प्रा.मधुसूदनव्यासः | ३७ |
| संस्कृतकवितागौरवम् | डॉ.रूपनारायणपाण्डेयः | ३८ |
| **मर्म गभीरम्** | मुनिकल्याणकीर्तिविजयः | ४० |
| **कथा** | | |
| **मानवप्रेम** | मुनिधर्मकीर्तिविजयः | ४३ |
| **मानवभवस्य मूल्यम्** | मुनिधर्मकीर्तिविजयः | ४४ |
| **संस्कारप्रपा** | मुनि अक्षयरत्नविजयः | ४६ |
| **नाम्नि किमस्ति ?** | सा. श्रीसौम्यप्रभाश्रीः | ५१ |
| **सरलता** | सा. तत्त्वनन्दिताश्रीः | ५२ |
| **परमस्य प्रेम** | सा. श्रीसंवेगरसाश्रीः | ५४ |
| **जीवनस्योद्धरणम्** | सा. श्रीसंवेगरसाश्रीः | ५५ |
| **परमार्हतः कविधनपालः** | सा. निसर्गप्रज्ञाश्रीः | ५७ |
| **मर्म नर्म** | कीर्तित्रयी | ५९ |
| **हास्यकणिकाः** | मुनिश्रुताङ्गचन्द्रविजयः | ६१ |
| **प्राकृतविभागः** | | |
| **प्राकृतद्व्याश्रयमहाकाव्यस्य संस्कृतानुसर्जनम्** | पं. नरेन्द्रचन्द्रझा | ६२ |
| **पाइयविन्नाणकहा** | आ.विजयकस्तूरसूरीश्वराः | ७८ |

• • •

# श्रीमदृषभदेवजिनेश्वरस्तोत्रम्

यो नाभिसूनुर्जित-षट्सपत्नः
स्वजन्मनोपार्जितदिव्यसिद्धिः ।
भूत्वोदराच्छ्रीमरुदेविकाया-
श्चकार दिव्यां स्वकुलोन्नतिं च ॥१॥

यज्जन्मनेन्द्रादिक-सर्वदेवाः
कोऽयं किमर्थं कुलशेखरोऽभूत् ।
यत्तेजसाऽऽदित्यमुखा हताभा
भवन्ति तस्माद् वृषभं चकार ॥२॥

सुमङ्गलाख्यां प्रमदां मनोज्ञां
यः पर्यणैषीत् स्वकुलाभिवृद्ध्यै ।
तस्यां सुपुत्रो भरतोऽजनिष्ट
स्वराज्यलक्ष्म्या विरतो बभूव ॥३॥

साम्राज्यलक्ष्मीं परिहाय तूर्णं
वनं गतो धर्ममुपेयिवान् यः ।
विनश्वरं लोकमिमं विदित्वा
स्वस्मिन् रतो दिव्यसुखान्यवाप ॥४॥

यद्वन्दनं यच्छ्रवणं च दिव्यं,
सद्यो भवेत् पापविनाशहेतुः ।
ध्यात्वा हृदा यं बहवोऽपि भव्या
गतिं परां प्रापुरनुत्तरां च ॥५॥

जिनेन्द्रधर्मं जगति प्रसार्य
यतिस्वरूपेण विशुद्धभावः ।
भोगाद् विरक्तिं परमामवाप्य
सिद्धाचलेऽस्मिन् निषसाद देवः ॥६॥

स्वजन्मना सच्चरणाद् विरागात्
तपःप्रभावाच्च जिनेश्वरोऽभूत् ।
श्रीवीतरागामलधर्ममाख्यात्
स्वभक्तकल्याणकरो बभूव ॥७॥

एवंप्रभावं वृषभं जिनेशं
विहाय देवं समुपासतेऽन्यम् ।
ते मृत्युलोके भुवि भारभूता
भवन्ति दारिद्र्ययुता युगेषु ॥८॥

देवस्य वृषभस्येदं स्तोत्रं योऽहर्निशं पठेत् ।
न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि ॥९॥

॥ इति श्रीमद्ऋषभदेवजिनेश्वरस्तोत्रं समाप्तम् ॥ (केनचिदज्ञातलेखकेन रचितम्)

# श्रीमहावीरस्तुतिः

जिनेषु दिव्यप्रभया स्वरोचिषा
विरोचमानो जिनधर्मतत्त्ववित् ।
जिनेन्द्रधर्मं तनितुं प्रजातवां-
स्तस्मै महावीर ! नमो नमोऽस्तु ते ॥१॥

वसन्तकाले गत उत्तरायणे
रवौ हि चैत्रे शुभशुक्लपक्षके ।
त्रयोदशीरात्रिपरार्द्धभागके
धृतावताराय च वीर ! ते नमः ॥२॥

महापवित्रे सुकुले प्रसिद्धे
जातो जनन्या जनकस्य पुण्यैः ।
यस्याऽवतारे चकिता हि देवाः
सदा महावीर ! नमोऽस्तु तस्मै ॥३॥

जन्मोत्सवे विश्वमिदं प्रसन्नं
वायुर्दिगीशा भुवि पादपाश्च ।
पतत्रिणश्चाऽपि समस्तजीवा
मुदं गता यस्य नमामि वीरम् ॥४॥

स्वजन्मकालेऽपि सहस्रभानोः
समानकान्त्या च दिगन्धकारः ।
विनाशमाप्तो बहुदिव्यरूपं
सौन्दर्यसिन्धुं च नमामि वीरम् ॥५॥

भूत्वा परानन्दप्रपूर्णरोचिः
पित्रोः परानन्दकरो बभूव ।
विद्याकलानीतिविशारदश्च
तस्मै महावीर ! नमो नमस्ते ॥६॥

इन्द्रादिदेवानतपादपीठो,
दिव्यां स्वलक्ष्मीमणिमादियुक्ताम् ।
रत्या अपि श्रेष्ठरुचिं स्वराज्ञ-
स्तत्याज तं वीरमहं नमामि ॥७॥

इदं जगद् देवभवादिवैभवं
विनाशि विज्ञाय विरक्तिमाप्तवान् ।
स्वयं च बोधात् परिगृह्य दीक्षणं
विज्ञानरूपत्वगताय ते नमः ॥८॥

तपःक्षमासत्यदयाप्रपूर्णो ।
ज्ञानेन कष्टानि विजित्य धीरः ।
कामादिदोषान् परिदह्य तूर्णं
ज्ञानाग्निना केवलिने नमोऽस्तु ॥९॥

तीर्थङ्कराख्यां पदवीमवाप्य,
भव्यान् जनांस्तारयितुं प्रयेते ।
ज्ञानोपदेशेन परोपकारी
मुक्तिप्रदो वीर ! नमामि तं त्वाम् ॥१०॥

॥ इति श्रीमहावीरस्तुतिः समाप्ता ॥ (केनचिदज्ञातलेखकेन रचिता)

# सकललब्धिनिधान-श्रीगौतमस्वाम्यष्टकम्

-आ.विजयहेमचन्द्रसूरिः

(ललित-वृत्तम्)

महिमशालिनं विश्वतारकं, गुणगणालयं गीतगौरवम् ।
सकललब्धिभृद्योगिनं स्तुवे, गणधरोत्तमं गौतमप्रभुम् ॥१॥

चरमतीर्थकृत्पट्टभास्करो, मुनिततीडितः कामितप्रदः ।
सुरवरैर्नुतस्तेजसान्निधि-र्विजयतेतरां गौतमेश्वरः ॥२॥

चरितमद्भुतं ते दयानिधे ! जडमतिः कथं स्तोतुमुत्सहे ।
तव कराम्बुजाद् दीक्षिताः समे, मुनिवरा ययुर्मुक्तिमन्दिरम् ॥३॥

भविकतायिनं मुक्तिदायिनं, कुमतनाशिनं तत्त्वपायिनम् ।
पतितपावनं भाविराजितं, प्रणिदधेऽन्वहं गौतमेश्वरम् ॥४॥

गणभृदग्रणीः श्रेयसां पदं, हितकरो नृणां पापनाशकः ।
विमलदर्शनः कर्मजित्वरो, विजयतेतरां गौतमेश्वरः ॥५॥

नमनतस्त्वयि श्रीगणाधिप ! सकलकल्मषं नश्यति ध्रुवम् ।
पवितनाम ते यत्र राजते, भवति तत्र नो विघ्नकल्पना ॥६॥

गिरिवरे गतोऽष्टापदे भवान्, भगवतोऽर्चितुं स्वीयशक्तितः ।
अतुलसारवन् ! नाथ ! ते गुणान्, गणयितुं क्षितौ केन पार्यते ॥७॥

तव पदाम्बुजे वन्दना सदा, भवतु मे प्रभो ! योगिसत्तम ! ।
तव प्रभावती मंगलावलि-र्मम दिने दिने देव ! जायताम् ॥८॥

अष्टकं गौतमेशस्य, सर्वसिद्धिप्रदायकम् ।
रचितं **हेमचन्द्रेण**, गुरुदेवांघ्रिसेविना ॥९॥

# श्रीगौतमस्वामिस्तुतिः

-आ.विजयहेमचन्द्रसूरिः

**( प्राभातिकरागः )**

स्वर्णपद्मासने राजमानं नुवे,
योगिराजं सुरेन्द्रार्च्यपादम् ।
सर्वलब्ध्याकरं वरगुणांभोनिधिं
श्रीवसुभूतिपृथ्व्यङ्गजातम् ॥१॥

सर्वकार्यं नृणां यदभिधानाद् द्रुतं,
सिद्ध्यतीष्टं च नो विघ्नलेशः ।
वर्धमानप्रभोराद्यगणभृद्वरं,
बीजमतिशालिनं श्रीन्द्रभूतिम् ॥२॥

# महोपाध्यायश्रीमद्यशोविजयगुणस्तुत्यष्टकम्

-आ.विजयहेमचन्द्रसूरिः

(वैतालीयवृत्तम्)

यशसा खलु विश्रुतात्मने,
जिनधर्मैकनिबद्धचेतसे ।
विजयाय यशोऽभिधाय ते,
सदुपाध्यायवराय नौम्यहम् ॥१॥

जितवादिगजेन्द्रसंहतिं,
परितः प्रौढविभाविभासितम् ।
जगदेकविपश्चितं न को,
भुवि जानाति सुतर्कपण्डितम् ॥२॥

मुनिना निजजन्मनाऽमुना,
महनीयेन 'कनोडु'नामकम् ।
पुरमत्यधिकं पवित्रितं,
कुरुते किन्नहि सत्समागमः ? ॥३॥

स्पृहणीयगुणं नयाभिधं,
विजयान्तं गुरुमाश्रितः सुधीः ।
तदुपासनया प्रपेदिवान्,
विमलज्ञानविभासिसत्क्रियाम् ॥४॥

नगरीं श्रुतसिद्धिसाधिका-
मथ काशीमधिगत्य मञ्जुलाम् ।
चिरमेकमनाः सरस्वती-
मुपतस्थे तमसो निवृत्तये ॥५॥

समशास्त्रविमर्शकोविदः
सदनेकान्तमताब्धिपारगः ।
हितकारिवरोपदेशकः,
किमु धन्यो न मुनीश्वरोऽवनौ ? ॥६॥

रचिता विविधा गुणोज्ज्वलाः
कृतयस्तर्कवितर्कमण्डिताः ।
विदुषा महता सुदुर्ग्रहा,
विबुधा याभिरहो चमत्कृताः ॥७॥

जिनदर्शनतत्त्वदीपकः,
प्रशमादीद्धगुणौघसंवृतः ।
भविकव्रजबोधदायको,
गणिराजो नितरां विराजताम् ॥८॥

इति वाचकपुङ्गवो मया,
महितस्तद्गुणपुष्पमालया ।
गुरुदेवपदम्बुजालिना,
कलधौतान्वितसोमसाधुना ॥९॥

# दीक्षा नाम किम् ?

अस्माकं जीवने अस्माभिः बहूनि श्रेष्ठवस्तूनि प्राप्तानि सन्ति । किं तानि वस्तूनि वयं जानीमः ? नैव, जानन्तोऽपि वा सर्वथा तानि उपेक्षामहे । कानि तानि वस्तूनि ? किं धनं परिवारः ऐश्वर्यं सुन्दरं शरीरं वा ? नैव नैव नैव.... अस्माभिः प्राप्तानि श्रेष्ठवस्तूनि इमानि - मनुष्यगतिः, आर्यकुलं, सम्पूर्णः कायः, उत्तमः परिवारः, अहिंसादिकः धर्मः, धर्मप्रवर्तकास्तीर्थकराः, धर्मदेशका गुरवः, धर्मपालनानुकूलं च आर्थिकं सामाजिकं च वातावरणम् । अ ह ह ह ह .... अन्यैः बहुबहुभिर्नैव प्राप्तमिदं सर्वम् । परन्तु किं वयमेतेन सर्वेण स्वं सुखिनं धन्यं च मन्यामहे उत यथाकथमपि प्राप्तैः भौतिकैः सुखसाधनैरेव सुखिनं धन्यं च मन्यामहे ? सत्यं तु एतदेव अस्ति । अस्माकं परमं सुखमस्ति भौतिकवस्तुषु एव । धर्मं तु वयं तमेवाऽऽचरामो येन भौतिकं सुखं प्राप्स्यते इति विश्वासः स्यात् । एतदर्थं दुर्लभाया मनुष्यगत्यादिसामग्र्याः उपयोगः सर्वथा अवास्तविकः । तस्या उपयोगः अस्ति केवलं धर्मसिद्ध्यर्थम् आत्मोन्नत्यर्थं च । एतच्च केवलं दीक्षाग्रहणेनैव सिद्ध्येत ।

ततश्च अस्माकं प्रश्नस्य समाधानमेतदेव यद् **दीक्षा नाम** अस्माभिः प्राप्तस्य सर्वस्याऽपि श्रेष्ठवस्तुनः सर्वथा समुचित उत्कृष्टश्च उपयोगः, दुरुपयोगस्य च सर्वथा अभावः । एतदर्थं चैव सर्वोऽपि अयं पुरुषार्थः । एतदेव च श्रेष्ठं फलं मनुष्यजन्मकल्पतरोः ।

(अज्ञातकर्तृकोऽयं लेखः)

# सिद्धाचलेश्वरस्तवना

श्रीसिद्धाचलेऽस्मिन् विराजमानो भगवान् जिनेश्वरो जगत्यां कुत्राऽप्यासनं न कृतवान् अत्रैव चोपविवेश, तत्किकारणम् ? तस्मिन् विषये बहूनि कारणानि सन्ति । तानि आचार्यश्रीविजयनेमिसूरिसमा ज्ञानचक्षुष एव जानन्ति, न त्वन्ये चर्मचक्षुष: । श्रूयन्तां तत्कारणानि ।

**पर्वतगुणान् वदति देवो**

यथा – पर्वतो वायुवृष्ट्यग्निभवं दु:खं न गणयति किन्तु स्वयं तत्सम्भवं दु:खमनुभूय परानौषधिकदम्बकमूलफलजलवृक्षादिभिस्तोषयति, परं स्वयं तु पर्वत: स्थिरो धीरो भवति, तथाऽहमपि दुर्जनानुवादेन न कुप्यामि स्वभक्तानुवादेन न हृष्यामीति । यथा पर्वतात् सर्वं भूतलं दृश्यते, तथा ममाऽपि समाधिस्थितत्वाज्जगतीतलं भूगोलमनेकब्रह्माण्डान्यपि हस्तामलकवद् दर्शनगोचरा भवन्तु । यथा पर्वतोऽनेकजीवानामाश्रयो भवति, तथा मद्रूपमपि मद्भक्तानामाश्रयोऽस्ति इति । यथा पर्वतो लक्षवर्षान्तरेऽपि न नश्यति, तथाऽहमपि त्रिकाला-बाध्योऽविनाशीति ।

**सूर्यगुणान् वदति देव:**

पर्वतात् सूर्य: समीपे वर्तते, यथा सूर्य: स्वप्रभया तिमिरनाशं करोति तथाऽहमपि स्वतप:प्रभया मम मूर्ते रुचिराकृतितया सद्रत्नालङ्कारेण मद्भक्तानामज्ञानतिमिरं नाशयामि ज्ञानप्रभारूपप्रकाशं च ददामि । यथा सूर्य: किरणैर्ग्रीष्मे सञ्चितं जलं वर्षासु विमुञ्चति तथाऽहमपि मत्त: सञ्चितं ज्ञानं भक्तेभ्यो वितरामीति ।

**समुद्रगुणान् वदति देव:**

पर्वतात् समुद्रोऽपि दृश्यते । समुद्रोऽपि यथा वर्षासु न वर्द्धते ग्रीष्मे च न क्षीयते तथाऽहमपि सम्पत्तौ विपत्तौ च विकारं नाऽऽप्नोमि । यथा समुद्रान्तरमूल्यानि रत्नानि दृश्यन्ते तथा ममाऽपि भावं ज्ञातुं न कोऽपि समर्थोऽस्ति । एवं पर्वतोपरि स्थित्वा भक्तेभ्यो ज्ञानं ददामीतिहेतोरत्रैवोपयुक्त समग्रदृष्टान्तद्वारोपविशामि ।

पर्वतादाकाशं समीपं तत्सर्वत्र दृश्यते किन्तु न तस्याऽन्तो दृश्यते । तथाऽहमपि प्रत्यगात्मा केवलज्ञानविषयतया सर्वान्तर्यामी परं जगन्नाशेऽपि अहमविनाशीत्यर्थ: । अतोऽत्रैवोपविष्टोऽस्मि । तत्रस्थं

जिनेश्वरम्प्रति प्रतिदिनं रात्रौ तालध्वजस्थो हस्तगिरिस्थो रेवताचलस्थश्चेति सर्वे तीर्थाधिष्ठायका देवा दिव्यशक्त्याऽऽगत्य नत्वा सहोपविश्य परमात्मभक्तानां जनानां कथं श्रेयो भवेदिति विचारयामासुः ।

एको जिनेन्द्रस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म
जिनेन्द्र-नामी न पुनर्भवाय । १ ।

**॥ इति श्रीसिद्धाचलेश्वरस्तवना ॥**

**( अज्ञातकर्तृका )**

# आत्मन्येव सम्पश्याम

मुनिरम्याङ्गरत्नविजय:

निरभ्रव्योम आपाततो घनघोरवर्षधरैः सञ्छन्नम्। विहायो विद्युद्विरुतैर्गर्जितम्। एतादृशे समये समुद्रमध्ये एकः कोऽपि पोतस्तरति स्म । अस्मिन् पोते दश पर्यटकाः सञ्चरिष्णव आसन् । ते सर्वे अन्तरिक्षे दृशौ उन्मील्य सम्प्रेक्षन्ते स्म । सर्वेषां श्वसनक्रिया स्तम्भितेव जाता । अञ्जसा तत्र सिन्धौ सलिलस्याऽतितीव्रक्षोभेण प्रवहणं सञ्चलितम्। सिन्धोः संरम्भोऽपि प्रतिक्षणं विवर्धते स्म । अधुनैव स्वीयजलयानस्य व्याधूननात् 'सर्वे पथिका रत्नाकरस्य तलं गमिष्यन्ति' इति धिया दशाऽपि यात्रिका भयान्विता बभूवुः । तावत् तत्र तेभ्यो दशान्यतमेभ्यः कश्चिदुवाच – 'भ्रातरः ! अस्मभ्यो दशभ्यः कश्चिदेकोऽपराधी स्यात्, तदेकस्य पातकिनः पापादेवाऽद्याऽस्माकं निमज्जनवेला आगता स्यात् ।' सर्वेषां तत् समीचीनं प्रतिभातं, यदुत – निश्चित-मस्मद्दशान्यतमः कोऽपि एको महापातकी भवेत्, तस्य पापादेव एषोऽनर्थावसरः समागतः । तमपराधिनमुत्पाट्य रत्नाकरस्य रन्ध्रे उत्क्षिपामः । एतद्विषये सम्मताः सर्वे, परन्तु तं दुरात्मानं सर्वेभ्यो व्यतिरिक्तं कथमुत्पश्येयुः ? केनचिच्चतुरेण अत्र युक्तिर्दर्शिता यदस्मद्दशान्यतमेन प्रत्येकं जनेनेषत्कालपर्यन्तं जलयानस्य बहिरनुक्रमेण कूर्दयित्वा तरणीयम् । इत्थं यस्य नरस्य बहिर्गमनादुत्पातः स्तिमितो भवेत्, 'स पातकी'ति मत्वा न पुनः प्रवहणे तमागन्तुमनुमन्येमहि । यदि तस्य बहिर्गमनाद् विप्लवो न विरमेत्, ततस्तं निर्दोषमवगम्य किञ्चित्क्षणानन्तरं नौकायां पुनस्स्वीकुर्याम । सर्वेभ्योऽयं विकल्पो रुचितः । एवंरीत्या प्रत्येकं नरोऽनुक्रमेण प्रवहणादुत्प्लुत्य बहिस्समुद्रे तरति स्म । किन्तूत्पातः तदवस्थ एव । नवानामानुपूर्वी समाप्ता । दशमस्य जनस्याऽवसर आगतः । प्रभोर्नाम स्मृत्वा स पोताद् बहिरगाधजलमध्ये पतितः । तदा सर्वेषामेषा दृढा मतिरासीत्, यदयमन्तिमो नरः, साम्प्रतमवश्यमेवोत्पात उपरतः स्यात् । किन्त्वेतत् किम् ? रे महानर्थः सञ्जातः । तस्य दशमजनस्य बहिर्गमनानन्तरं तत्क्षणमेव समुद्रस्य सलिलेन तत्प्रवहणं स्वीयगर्भे समावेशितम् । प्रवहणस्था नवाऽपि पथिकाः स्वात्मानं 'पुण्यभाजो वयं' इति मन्वानाः सर्वेऽपि समुद्रस्य तलभागं प्राप्ताः । एतर्हि रिक्तप्रवहणमात्रमुत्तरति स्म, स दशमपथिको भग्नहृदयेनाऽमीषां नवानां सहयात्रिणां दयनीयस्थितिं दृष्ट्वा रिक्तप्रवहणमालम्बनीकृत्य पुनस्तस्मिन् समुपविष्टः । तत्पश्चात् सिन्धोर्विप्लव उपशान्तः। अन्तरिक्षं पूर्ववत् शनैः शनैः पुनर्निरभ्रं जातम् ।

अत्र कस्यचिदेस्य जनस्य पापादपरे नवाऽपि नरा निमज्जनस्य भयमासेवन्ते स्म । किन्तु तन्मिथ्या, एकस्मादुत्तमात् पुण्यभाज आत्मनः प्रभावादेवाऽवशिष्टा नवाऽपि नरा आरक्षिता आसन् । वयं सर्वेऽप्यस्माकं दुर्विपाकार्थं 'अनेनाऽपरजनेनाऽपराद्धम्' इत्याशङ्कामहे । कस्यचिदुपकृतिं द्रष्टुं न शक्नुमः, अपरेषां छिद्राण्यवगन्तुमस्मदपराधांश्चोपगूहितुं वयं पटवः स्मः । संसारस्य सन्धानकरणे सोच्छ्वासा वयं केवलं, स्वात्मानमेव संस्कुर्याम यदि तदा सृष्टिमध्यादेकोऽधमनरस्त्ववश्यमेव क्षीयेत ।

आगच्छत ! आत्मनिरीक्षणस्य वर्त्मनि प्रस्थाय स्वात्मनो दोषान्दूरीकर्तुं जागृतिं बिभ्राणा वयमात्मन्येव सम्पश्याम ॥

# जीवनमौक्तिकम्

मुनिरम्याङ्गरत्नविजयः

## ( १ ) हिंसया दूयते इति हिन्दुः

'वयं हिन्दवस्स्मः' इति संवित्कारका वयं 'हिन्दु'पदस्य अर्थं किं सम्यगवबुध्यामः ? पौराणिकशास्त्रे,- 'स्मृतौ' 'हिन्दु'शब्दस्य समाख्यानमेवं विवृतम् -

- यथा - 'हिंसया दूयते इति हिन्दुः' । हिंसया यो जनः संसीदति, स 'हिन्दु'अभिख्यया अभिधातव्यः । यो वस्तुतो वाच्यत्वेन हिन्दुः स काञ्चिदपि प्राणिहिंसां न कुर्यात् । अनभिज्ञतया कथञ्चित्तेन हननक्रियासंभवेऽपि दयार्द्रतया तस्य चित्तं विषण्णायेत । कदाचिच्चाऽन्यजीवं हिंसन्तं परव्यक्तिं दृष्ट्वा 'हिन्दु' जनस्य हृदयमतीव दूयेताऽपि । यत्किञ्चिदेतत् - कस्मिंश्चिदपि देशे स सञ्जायेत । यदि प्राणव्यपरोपणात्मिका हिंसा तेन संत्यक्ता, अहिंसाकरुणे च द्वे आत्मकवचे संरक्षिते, तदाऽयं 'हिन्दु'*स्वरूपख्यापकग्रन्थनिर्देशानुसारं यथार्थतया* हिन्दुत्वेन व्यपदेशपात्रम् । एतादृशां हिन्दूनां जनपद एव 'हिन्दुस्थान'रूपेण ख्यातः ।

## ( २ ) नाऽतत्त्ववेदिवादः सम्यग्वादः

तत्त्वज्ञानविषयणीं वार्तां चर्चयितुमस्माकं यदि समीहा तदा तत्त्वविदो भवेम । तत्त्वज्ञानमन्तरेण वयं तत्त्वविषयकवादविवादौ न कर्तुमर्हाः । अतः प्रतिसमयं तत्त्वख्यातिसंप्राप्त्यर्थमायतामहै । ये यथार्थतया तत्त्वविदस्तदन्तिके विनयावनतिपुरस्सरमुपविश्य तत्त्वसंज्ञानं संपद्यामहै । इत्थं ये महापुरुषाः प्रत्यक्षज्ञानिनः सर्वज्ञा वीतरागाश्च स्युः, तेषां महापुरुषाणां वादः सम्यग्वादः, तदनुसारिणां चाऽपि सद्वाद एव । तथा च - अत्र प्रयत्नप्रज्ञोभयशालिसज्जनः प्रायोगिकतत्त्ववेदित्वेन विना पूर्वग्रहं सर्वज्ञ-तत्त्ववेदि-महापुरुषैर्दर्शितं तत्त्वज्ञानं प्राप्तुमाघटते । ततो वयं तत्त्ववेदिभवनानन्तरं तत्त्ववार्तां विस्तीर्य अन्यान् प्रति तां प्रवितरामः ।

## ( ३ ) ज्वलदग्निसमं जगत्

दन्दह्यमानदारुणदावानलसमोऽयं संसारः, अनाद्यनन्तस्वरूपः । तमुपशमयितुं जगति न कोऽपि प्रत्यलम् । अचिन्त्यानुपमवीर्यवान् ईशोऽपि तत्प्रशमनाय न यतते । बाढमस्मात् संसारात् निर्गन्तुमनसो जीवान्

समुद्धृत्य अपुनरागमनाय सत्पथः तेन प्ररूपितः, निर्गतजीवानां च योगक्षेममपि कृतम्। किन्त्वत्र विषये अस्माकं किं कर्तव्यम् ? अस्मदीयान्तर्मनसि तादृशी वेदना सञ्जायेत, यज्ज्वलदग्निसमे जगति कथमस्माभिः स्थातव्यम् ?

## (४)

## ''अर्हं'' इत्येतदक्षरं ब्रह्म

''अहम्''- जगदान्ध्यकृतोऽस्य द्विविधाऽवस्थितिः। एका तावत् स्वयं (= आत्मा) पराभूय विनम्रतायां विलीनो भवेत्, द्वितीया च पराभवनानन्तरमपि निश्चलतया स्थाणुरिव निष्प्रकम्पो भवेत्। प्रथमपक्षे नाऽत्र विचारणा आवश्यकी, अपरपक्षे तु करणीया - यत्पराभवनानन्तरमपि यदि युष्मद्विवेकदृष्टिरनावृता तर्हि 'अहं' पदं 'अर्हम्'इत्येतदाराधनाया धारायां संवहेत्। तदा चैतद् ''अर्हं'' पदं परमब्रह्माक्षररूपेण परिणमेत् आत्ममलविशुद्धिकरणात्। अस्य अन्यथाक्रमे तु - यदवधीरणानन्तरमपि आन्तरचक्षुरपरनाम विवेकदृष्टि-र्नोन्मीलिता तदाऽसौ 'अहं' जीवं संतप्य भवचक्रे परिभ्रामयेत्। अनुसंधत्त अन्तःकरणे। शोधनं कुरुत मनसः। द्विविधस्वरूपेऽस्मिन् कीदृशे बन्धने आबद्धा स्मः। तस्मात् पाशनिवृत्त्यै परमेश्वररूपप्राप्त्यर्थं च ''अर्हम्'' इति मन्त्रमनुस्मरेम। तत्रैव अस्मद्मनो निदध्याम। येन दैवोपहतोऽसौ 'अहं' कान्दिशीकतया पलायेत।

# भारतीयसंस्कृतौ यज्ञो वै श्रेष्ठतमं कर्म

- डो. रामकिशोरमिश्रः

भारतमेकं बहुविशालं राष्ट्रमस्ति। एतदस्माकं भारतं काश्मीरादण्डमान-निकोवारद्वीपसमूहपर्यन्तं विस्तृतं वर्तते। अत्र बहुजातीया विभिन्नधार्मिकाश्च जना निवसन्ति। भारतीयसंस्कृतिर्विश्वस्य समस्तसंस्कृतिषु प्राचीनतमाऽस्ति। मनुरादिसृष्टिजनको बभूव। मनोरपत्यं पुमान् इति मानव इति व्युत्पत्त्या जगतः सर्वे मानवा मनोः सन्ततयः सन्ति। मनोरुत्पत्तिमूलस्थली भारतभूमिरस्ति। अस्मादेव भारतवर्षादत्र समस्तपृथिव्यां मानवसृष्टिविस्तारोऽभवत्। अतो मनुस्मृतिकारेण लिखितम् -

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ मनुस्मृतिः - २/२०**

## भारतीयसंस्कृतेः स्वरूपम्

संस्करणं परिष्करणं दुरितव्यपोहनं दुर्भावदहनं च संस्कृतिरिति। जीवनोन्नतिसाधिनी, सद्गुणसंग्राहिणी, सत्पथगामिनी, ज्ञानज्योतिःप्रचारिणी संस्कृतिरस्माकं जीवनस्याऽन्तरङ्गं स्वरूपं प्रकाशयति। मननं, चिन्तनं, दार्शनिकं मनोवैज्ञानिकमन्वेषणं विश्लेषणं च, जीवनोत्कर्षाधायकतत्त्वानां गवेषणं, कर्तव्याकर्तव्यविवेचनं समष्टेर्व्यष्टेश्च स्वरूपं, जीवनस्योद्देश्यं लक्ष्यं च, लोकव्यवस्थितेः साधनानि, प्रकृतिपुरुषयोर्भेदाभेदविवेचनं सर्वमेतत्संस्कृत्या संगृह्यते।

सृष्टेः सञ्चालनाय संरक्षणाय समुत्थानाय च मनुना वेदाधारेण चतुर्णां वर्णानामाश्रमानां च व्यवस्था कृता। तस्या व्यवस्थाया अनुसारेण सदाचरणाभावादद्य पतनं भवति। भाषा-वेषाहार-संस्काराणां समुदायः संस्कृतिः कथ्यते। संस्कार एव संस्कृतिरिति।

## संस्कृतिः संस्कृताश्रया

ईदृशः कश्चिदस्ति विषयः, यः संस्कृतौ न गृह्यते ? वेदेषु धर्मसूत्रेषूपनिषत्सु दर्शनेषु स्मृतिषु च

पुरुषार्थचतुष्टयस्य कर्तव्याऽकर्तव्ययोश्च विवृतिः संस्कृतिविषयो भवति । अहिंसा-सत्यास्तेय-ब्रह्मचर्या-ऽपरिग्रहादीनामवश्यकर्तव्यत्वेन निर्देशः । आस्तिक्यमनास्तिक्यं धर्मबुद्धिश्चेति संस्कृतेर्वैशिष्ट्यम्। उपनिषत्सु ब्रह्मप्राप्तिरात्मज्ञानं वा निर्दिश्यते । यथा -

**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।**

(बृहदारण्यकोपनिषद् - ५/५/१५)

यदि तपसा ब्रह्मसाक्षात्कारो जीवनेऽस्मिन्न क्रियते, तर्हि जीवनं विफलमेव ।

ब्रह्मज्ञानेनैव जीवनस्योपयोगिता भवति । यथा -

**इह चेदवेदीदथ सत्यमस्ति, न चेदिहाऽवेदीन्महती विनष्टिः ।**
**भूतेषु भूतेषु विचिन्त्य धीराः, प्रेत्याऽस्माल्लोकादमृता भवन्ति ॥**

तथा च

**ईशावास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥**

संस्कृतिर्लोकेषु विश्वबन्धुत्वभावनां जागरयति । समत्वदृष्टिसम्पादनेन स्वपरहितविभेदनिवारणेन सार्वभौतिकीं सार्वलौकिकीं चोन्नतिं निर्दिशति ।

यथा - **मित्रस्याऽहं चक्षुषा सर्वाणि भूतानि समीक्षे ।**
**मित्रस्य चक्षुषा समीक्षामहे ॥ यजुर्वेदः - ३६/१५**

भौतिकविषयेष्वनासक्तस्य तत्त्वज्ञानं भवति -

**हिरणमयेन पात्रेण सत्यस्याऽपिहितं मुखम् ।**
**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ ईशोपनिषद् - १५**

यज्ञः सर्वाङ्गीणोन्नतिसाधकः । परार्थसाधनेन साफल्यं प्राप्यते । परोपकारभावोदयः, स्वार्थपरित्याग-स्त्यागवृत्तित्वं च जीवने परमावश्यकम् । अतः कथ्यते - **यज्ञो वै श्रेष्ठतमं कर्म । ( शतपथब्राह्मणम् - १/७/१/५ ) ॥**

२९५/१४ पट्टीरामपुरम्, खेकड़ा - २५०१०१ (बागपत) उ. प्र.

# आर्यसत्यानां पर्यालोचनम्

हिराकुमारी झा

सर्वमपि जगद् दुःखं दुःखसाधनं दुःखायतनमित्यनुभूय दुःखपङ्कनिमग्नानां प्राणिनामात्मनश्च दुःखं निरोद्धुकामः सिद्धार्थगौतमस्तन्निरोधमार्गं गवेषितवान् । कालान्तरे च बुद्धनाम्ना प्रसिद्धः सन् भिक्षूणां वैराग्याय सत्पथप्रदर्शनाय च कानिचिद् दार्शनिकतत्त्वानि काँश्चन च धार्मिकतत्त्वविशेषानुपदिदेश। स एवोपदेशो नागार्जुनाऽसङ्गबन्धु-धर्मकीर्तिप्रभृतिभिर्विद्वद्भिर्न्यायप्रमाणाभ्यां परीक्षितः प्रवर्धितः पश्चाच्च संसारे सौगतदर्शननाम्ना प्रसिद्धो जातः । एतद्दर्शनसमानकालिकजैनदर्शनेऽपि मतस्याऽस्य विशेषतः खण्डनाय पर्यालोचनं दरीदृश्यते । तत्र बौद्धदर्शनपरिचयोपक्रमे षड्दर्शनसमुच्चयात्मके ग्रन्थे आचार्यहरिभद्रसूरय इत्थं प्रतिपादयन्ति –

**तत्र बौद्धमते तावत् देवता सुगतः किल ।**
**चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥**

(षड्दर्शनसमुच्चयः : ४)

तत्र बुद्धदर्शने भगवान् सुगतो देवः, सर्वेषामपि पदार्थानां तत्त्वज्ञानस्योपयोगितया चर्तुषु भागेषु विभज्य तदानीमुपदिष्टवान् भिक्षून् । सर्वमपि जगत् दुःखं दुःखसाधनं दुःखायतनमिति त्रिधा विभज्य जगतो दुःखात्मकतया हेयत्वं प्रतिपाद्य ततो जगन्निरोधाय तत्त्वज्ञानं सम्पादनीयमिति प्रोक्तवान् । तत्त्वानि च आर्यसत्यानि । एवं च विमलेन तत्त्वज्ञानेन दुःखसाधनस्य निरोधानन्तरं विमलज्ञानात्मको मोक्षो जायते । उक्तं च न्यायतन्त्रेऽपि –

**ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ।**
**अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः ॥**

(तर्कसङ्ग्रहः : पृ. १८८)

एवं चाऽऽर्यसत्यान्यपि परम्परया मोक्षोपयोगितया ज्ञातव्यानि, तानि च दुःख-दुःखसमुदय-निरोध-मार्गभेदात् चत्वारि सन्ति । तत्राऽऽदौ दुःखतत्त्वं व्याचिख्यासुराह –

१. दुःखम्

**दुःखं संसारिणः स्कन्धाः ते च पञ्च प्रकीर्तिताः ।**
**विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥**

(षड्दर्शनसमुच्चयः : ५)

संसरन्ति स्थानात् स्थानान्तरं व्रजन्ति मृगमदवासनावासितवसन इव भवाद् भवान्तरं व्रजन्त्येवंशीलाः संसारिणः स्कन्धाः सचेतना अचेतनाः वा परमाणुपुञ्जविशेषाः पञ्चस्कन्धात्मिकाः सन्ति, यथा विज्ञानस्कन्धः, वेदनास्कन्धः, संस्कारस्कन्धः, संज्ञास्कन्धः, रूपस्कन्धश्चेति ।

**१.१ विज्ञानस्कन्धः**

तत्र सर्वेषां प्रतिकूलवेदनविषयत्वोपलक्षितं विज्ञानात्मकं दुःखं प्रथमम् । रूपरसादिनिर्विषयकज्ञानं विज्ञानस्कन्धः । निर्विकल्पकज्ञानस्य स्वरूपमेव उच्यते -

**अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम् ।**
**बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥** - मीमांसा

एवं च सर्वमपि बाह्याभ्यन्तरज्ञानं विज्ञानस्कन्धः । तत्र बौद्धा द्विविधं विज्ञानं स्वीकुर्वन्ति - प्रवृत्तिविज्ञानमालयविज्ञानं च । पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्त्यवस्थायां चाऽऽलयविज्ञानधारा निराबाधा, प्रवृत्तिविज्ञानस्यैव प्रवाहः संसारः । प्रवृत्तिविज्ञानं घटादिविषयभेदेन भिन्नत्वादनेकविधम् इदमित्याकारकम् । अहमित्याकारकं सततानुवर्तमानमालयविज्ञानम् । द्विविधविज्ञानयोरनवरतप्रवाहो विज्ञानस्कन्ध इति फलितं भवति ।

**१.२ वेदनास्कन्धः**

सुखा-दुःखा-अदुःखाऽसुखाश्चेति वेदना वेदनास्कन्धो वोच्यते । वेदना च पूर्वतनप्रारब्धकर्मजन्यादृष्टविपाकाद् जायमानोऽनुभवः । वेदनास्कन्धस्योदाहरणं स्वयं भगवता बुद्धेनैकदा भिक्षामटाट्यमानेन कण्टकेन विद्धे चरणे प्रोक्तम् -

**इत एकनवते कल्पे शक्त्या मे पुरुषो हतः ।**
**तत्कर्मणो विपाकेन पादे विद्धोऽस्मि भिक्षवः ॥**

बुद्धत्वप्राप्त्यनन्तरं भगवता स्वयं एकोननवतिकल्पे कृतस्य परपुरुषघातकर्मजन्यादृष्टपाकवशादिदानीं विद्धपादोऽहमिति वदता वेदनास्कन्धस्योदाहरणं प्रस्तुतम् ।

**१.३ संज्ञास्कन्धः**

संज्ञानिमित्तोद्ग्रहणात्मकप्रत्ययः संज्ञास्कन्धः । अभिधालक्षणशक्त्या जायमानं ज्ञानं संज्ञास्कन्धः । एवं च तत्र नामजात्यादियोजनात्मकं सविषयकज्ञानं संज्ञास्कन्धः ।

### १.४ संस्कारस्कन्धः

पुण्यापुण्यादिधर्मसमुदायः संस्कारस्कन्धः । सादृश्यादृष्टचिन्तनादिसहकारिकारणोद्बोधकसंस्कारात् पूर्वानुभूतविषयस्य स्मृतिः समुत्पद्यते ।

### १.५ रूपस्कन्धः

तत्र श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि पञ्चेन्द्रियाणि तेषां शब्दस्पर्शरूपरसगन्धाः पञ्च विषयाः अविज्ञप्तिश्च । अत्राऽविज्ञप्तिपदेन शरीरं ग्राह्यम् । रूप्यन्ते प्राप्यन्ते विषया एभिः, रूप्यन्ते वा रूपाणि इति व्युत्पत्त्या रूपपदं शरीरेन्द्रियविषयपरम् । बौद्धमते पृथिव्यप्तेजोवायुगगनादीनां रूपस्कन्ध एवाऽन्तर्भावः ।

### २. दुःखसमुदयः

दुःखानि पञ्चविधानीति प्रपञ्च्य तदनन्तरं तत्कारणीभूतं दुःखसमुदयतत्त्वं किमिति जिज्ञासायामुच्यते -

**समुदेति यतो लोके रागादीनां गणोऽखिलः ।**
**आत्मात्मीयभावाख्यः समुदयः स उदाहृतः ॥**

(षड्दर्शनसमुच्चयः : ६)

यतो रागद्वेषलोभादिसमस्तदोषानामखिलो गणः समुदेति स दुःखसमुदयः कथितः । स च दुःखसमुदयः द्विविधः - हेतूपनिबद्धः प्रत्ययोपनिबद्धश्च ।

### २.१ प्रत्ययोपनिबद्धः

तत्र प्रथमस्य प्रत्ययोपपत्तिनिबन्धसमुदयस्य लक्षणसङ्ग्राहकसूत्रं प्रदर्शयति सर्वदर्शनसङ्ग्रहे **इदं प्रत्ययलक्षणम्** । इदं कार्यं येऽन्ये हेतवः प्रत्ययन्ति गच्छन्ति तेषां हेतूनां भावः प्रत्ययत्वं कारणसमुदयोपस्थितिः । अत्रेदं तात्पर्यम् - यथा नैयायिकादयः - कस्यचिद् चेतनावत ईश्वरस्य ज्ञानचिकीर्षाप्रयत्नं विना सकलकार्योत्पादजननसामग्रीसत्त्वेऽपि स्वतः कार्योत्पत्तिर्न दृश्यते अत ईशस्याऽपि असाधारणनिमित्तहेतुत्वमकामेनाऽपि स्वीकर्त्तव्यम् इति वदन्ति । तन्मतनिरसनाय प्रोक्तमिदम् - पृथिव्यादिधातूनां सन्निधानाद् बीजादङ्कुरोत्पत्तिसंभवे न हि कस्यचिद् चेतनावत ईश्वरस्य परिकल्पना । यथा बीजस्य पृथिव्यादिधातूनां षण्णां समन्वयात् अङ्कुरः परिवर्तते । तत्र क्रमो यथा - पृथिवी अङ्कुरस्य काठिन्यं जनयति, अब्धातुः स्नेहं रसं च जनयति, तेजो रूपमौष्ण्यं च समुत्पादयति, वायुः स्पर्शनं चलनं च, आकाशपदार्थः अवकाशं शब्दं च जनयति ।

### २.२ हेतूपनिबन्धनः

हेतूपनिबन्धनस्य संग्राहकं सूत्रमिदम् - **उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्यसमुत्पादानुलोमता** - (सर्वदर्शनसङ्ग्रहः) । बौद्धानां मते धर्माणां कार्यकारणरूपानां या धर्मता कार्यत्वकारणत्वरूपा एषा उत्पादादनुत्पादाद्वा स्थिता । यत्सत्त्वे यदुत्पद्यते यदभावे यन्नोपपद्यते तत्तस्य कारणं भवति । कार्यस्य कारणानतिक्रमेण स्थितिः । धर्मस्य कारणस्य कार्यं प्रति नियामकता इति सिद्धान्तात् चेतनामन्तरेणैव सर्वत्र कार्यकारणभावः सङ्गच्छते । प्रतीत्यसमुत्पादस्य हेतूपनिबन्धनो यथा

बीजादङ्कुरः, अङ्कुरात्काण्डं, काण्डान्नलः, नालाद् गर्भः, ततः शूकं, ततः पुष्पं, ततः फलम् । न चैते चेतनाः, न कश्चिच्चेतनावानीश्वरः अभ्युपेयः ।

### ३. मार्गः

संसारप्रवृत्तिनिमित्तभूतौ दुःखदुःखसमुदयौ च निरूप्येदानीं मार्गतत्त्वं निरूपयति । तत्र धर्मानुकूल-तत्त्वज्ञानोपयोगिभूताचारो मार्ग उच्यते । स च मार्गोऽष्टविधः - सम्यग्दृष्टिः, सम्यग्वाग्, सम्यक्कर्मान्तः, सम्यक्सङ्कल्पः, सम्यगाजीवनम्, सम्यग्व्यवसायः, सम्यक्स्मृतिः, सम्यक्समाधिश्चेति मार्गोऽयमष्टाङ्गि-कमार्गशब्देन उच्यते ।

### ३.१ सम्यग्दृष्टिः

तत्र कुशलाकुशलकर्मज्ञानवान् । तत्र कुशलाकुशलकर्माणि च कायिकवाचिकमानसिकभेदात् त्रिविधानि भवन्ति । तत्र कायिककुशलर्कमाणि अहिंसाऽस्तेव्यभिचारादयः, कायिकाकुशलकर्माणि हिंसा-चौर्य-व्यभि-चाराः । वाचिककुशलकर्माणि अप्रलापामिथ्याभाषणापैशुन्याकटुवचनानि, वाचिकाकुशलकर्माणि प्रलाप-मिथ्याभाषण-पैशुन्य-कटुवचनानि । मानसिककुशलकर्माणि अलोभाप्रतिहिंसामिथ्यादृष्टयः । मानसिका-कुशलकर्माणि लोभ-प्रतिहिंसा-मिथ्यादष्टयः ।

### ३.२ सम्यक्संकल्पः

सर्वभूतेषु अद्रोहभावनं सर्वविषयस्य च निष्कामता मनसो व्यापारः सम्यक्संकल्पो भण्यते ।

### ३.३ सम्यग्वचनम्

तत्र व्यवहारे सति आवश्यके सत्यं प्रियं हितं मितं च वक्तव्यम् ।

### ३.४ सम्यक्कर्मान्तः

तत्र शास्त्रप्रतिपादितपञ्चशीलादिकर्मणामनुष्ठानं सम्यक्कर्मान्त उच्यते । तत्र अहिंसा-सत्यास्तेय-ब्रह्मचर्याणामनुष्ठानं सुरापरित्यागश्च निगद्यते । अन्यानि च पञ्च कर्माणि भगवता बुद्धेनोपदिष्टानि- अपराह्णभोजनपरित्यागः, संगीतत्यागः, अमूल्यशय्यात्यागः, मालाधारणत्यागश्चेत्यादीनि ।

### ३.५ सम्यगाजीवनम्

जीविकार्थे सद्वृत्तीनां ग्रहणम् ।

### ३.६ सम्यग्व्यवसायः

सत्प्रयत्नः, सत्कर्मणा पदार्थाभिलषितुरिच्छा ।

### ३.७ सम्यक्स्मृतिः

सम्यक्स्मृतिरत्र यथार्थानुभवस्य स्मरणम् । चत्वारि स्मृतिप्रस्थानानि - कायानुपश्यत्ता, वेदनानुपश्यत्ता, चित्तानुपश्यत्ता, धर्मानुपश्यत्ता । तत्र रुधिरमांसास्थिमलमूत्रादिमयं कायं स्मरतो नाऽऽसक्तिः । एवं सुखदुःखादिरूपवेदनामनुस्मरतस्तत्र नाऽऽसक्तिः ।

### ३.८ सम्यक्समाधिः

समाधिस्तत्र चितैकाग्रता । यदाऽष्टाङ्गकर्मणां निरन्तरेणाऽऽसेवनं क्रियते तदाऽनासक्ते चेतसि वैराग्यधारा जायते, तदनन्तरं मनोलयः संपद्यते । तत्र शीलेन कायशुद्धिः, समाधिना चित्तशुद्धिः, शुद्धे चेतसि ज्ञानप्राप्तिः । मार्गनिरोधयोर्लक्षणानि –

**क्षणिकाः सर्वसंस्कारा इति या वासना स्थिरा ।**
**स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ।।** (विवेकविलासः)

### ४. निरोधः

चित्तस्य निःक्लेशावस्थारूपो निरोधो मुक्तिर्निगद्यते । हेयो ह्यर्थो हातुमिष्यत इति वदता हानापरपर्यायो जन्माभावो दुःखाभावो नैरात्म्यभावनातो ज्ञानसंतानोच्छेदो वा मोक्ष इति फलितार्थः ।

### निष्कर्षः

सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थंकरसंमतत्वात् तन्निवृत्त्यर्थिनां तेषां तन्निवृत्त्युपाये प्रवृत्तिर्दृश्यते । तत्र भगवतो बुद्धस्य समये विशेषतो वेदवासनावासितचित्ता अनादिनिधनमपौरुषेयं किमपि शब्दप्रमाणं वेदलक्षणं प्राधान्येन स्वीकृत्य वेदानुकूलतर्कप्रमाणमाख्यापयन्तः प्रवर्तन्ते स्म । किन्तु भगवता तथागतेन तर्कशलाकाञ्जनेन सिद्धं वेदविरुद्धसिद्धान्तमपि प्रतिपाद्याऽवाचि – **परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवाद्** । तथागतेन प्रतिपादितानि तत्त्वानि न श्रद्धेयानि अपि तु परीक्ष्यानुभवितव्यानि इति नवीन-परीक्षामार्गोऽप्युपदिष्टः । अत्र प्रतिपादितानि आर्यतत्त्वानि सर्वानुभववगम्यानि, अतो दुःख-दुःखसमुदय-निरोध-मार्गाश्चेति तत्त्वानामन्वेषणं दुःखनिवृत्तये कर्तव्यमिति फलितार्थः ।

## सन्दर्भग्रन्थाः

भट्टः, अन्नम्, **तर्कसङ्ग्रहः** (वि. सं. २०४५) तृतीय संस्क., वाराणसी, वाणीविलासप्रकाशनम् ।

माधवाचार्यः, **सर्वदर्शनसङ्ग्रहः** (सन्. १९८४), वाराणसी, चौखम्बाविद्याभवनम् ।

सूरिः, हरिभद्रः, **षड्दर्शनसमुच्चयः** (१९७०), संपा. महेन्द्रकुमार जैन, वाराणसी भारतीयज्ञानपीठः ।

– जनकहजारीविद्यापीठम्

# ईशस्य न्यायोपासना

- डो. रामप्रसाद-पौडेलः

## १. पुरोवाक्

शास्त्रकारैः पदार्थनिरूपणावसरे पदार्थज्ञानस्य प्रयोजनमपि प्रतिपादितम् । तत् पदार्थचिन्तनमेव तत्र कालक्रमेण यथादेशं रुचीनां वैचित्र्यात् विविधदर्शनरूपेणाऽधिकारिभेदेन प्रसिद्धम् । तस्य दर्शनस्य विचारविकासोपक्रमे पश्चात् आस्तिकनास्तिकभेदेन द्विधा विभागः । तत्र वेदेश्वरयोरस्तित्वप्रतिपादक-दर्शनमास्तिकदर्शनम् । एवं च वेदेश्वरयोर्नास्तित्वप्रतिपादकं दर्शनं नास्तिकदर्शनमिति फलितम् । तत्र आस्तिकदर्शनानि तावत् साङ्ख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसोत्तरमीमांसाभेदात् षड्विधानि सन्ति । नास्तिकदर्शनानि चार्वाक-जैन-बौद्धभेदात् त्रिविधानि सन्ति । उक्तं च सायणमाधवाचार्यैः **"नास्तिकाः वेदबाह्यास्तान् बौद्धलोकायतार्हतान्"** इति (सर्वदर्शनसङ्ग्रहः, पृष्ठ ४६) । अत्र यद्यपि षड्विधानि दर्शनानि पूर्वोक्तानि एव इत्यत्र विदुषां नैकमतमस्ति । तत्र **षड्दर्शनसमुच्च्यात्मकग्रन्थे दर्शनानि षडेवाऽत्र मूलभेदव्यपेक्षया** इत्यादिरूपेण षड् भागेषु विभज्य षण्णां दर्शनानां नामान्याहुः —

**दर्शनानि षडेवाऽत्र मूलभेदव्यपेक्षया ।**
**देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः ॥**
**बौद्धं नैयायिकं साङ्ख्यं जैनं वैशेषिकं तथा ।**
**जैमनीयं च नामानि दर्शनानाममून्यहो ॥** (षड्दर्शनसमुच्चयः, १-२)

अनया रीत्या षड्विधदर्शनानां पृथक् परिगणना कृता तैः । तत्र षड्विधेषु दर्शनेषु व्यासेन समासेन वा अस्तित्वेन नास्तित्वेन वा प्रतिपाद्यः सर्वदर्शनवाच्य ईश्वरपदार्थः । तत्र सामान्यतः पदार्थो द्विविधः - लौकिकः - लोकानुभवगम्यः अलौकिकः-शास्त्रैकगम्यः यथा न्यायदर्शनप्रतिपाद्यद्रव्यादिसप्तपदार्थेषु द्रव्यगुणकर्म-सामान्यानि लोकानुभवगम्यानि कानिचिद् । विशेषपदार्थश्च शास्त्रैकगम्यः । यथा च -

**क्षित्यप्तेजोमरुद्व्योमकालदिक्देहिनो मनः** (न्यायसिद्धान्तमुक्तावली, पृ. ३)

इत्यत्र क्षित्यप्तेजोवायवा लोकानुभवगम्याः । आकाशकालदिगात्मानश्च शास्त्रैकगम्याः । एवं च

परमेश्वरोऽपि शास्त्रैकगम्यः। तस्य लक्षणं किम्? कतिविधः? कीदृशः? इतिविषये सर्वेषु तन्त्रेषु, दर्शनेषु, पुराणेषु, शास्त्रेषु च बहुत्र बहुशः प्रतिपादितामीश्वरविषयिणीं विप्रतिपत्तिं श्रुत्वा दृष्ट्वा च संकल्पविकल्पशालिप्रेक्षावतां धीमतां मनसि संशयो जायते। अतस्तादृशसंशयनिवारणाय न्यायशास्त्रप्रतिपादितेश्वरविषयिणी चर्चाऽत्र क्रियते। यतो हीयं च परिचर्चा स्वर्गापवर्गयोर्द्वारमपि उच्यते। उक्तं च **श्रीमदुदयनाचार्यैः** -

**स्वर्गापवर्गयोर्द्वारमामनन्ति मनीषिणः।**

**यदुपास्तिमसावत्र परमात्मा निरूप्यते॥** (न्यायकुसुमाञ्जलिः, १/३)

अत्र यद्यपि पूर्वपक्षिणो विवदन्ते ईश्वरविषये। लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः। **मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात्** इति सर्वतन्त्रसिद्धान्तसिद्धत्वात्। नह्यसत ईश्वरस्य लक्षणं प्रमाणं च संभवति। यथा असतो वन्ध्यापुत्रस्य न हि केनाऽपि लक्षणेन प्रमाणेन वा सिद्धिः, तद्वत् काभ्यामपि लक्षणप्रमाणाभ्यामीश्वरः साधयितुं न शक्यते। एवं च न्यायाभिमतप्रमाणान्यपि न्यायाभिमतेश्वरं साधयितुं समर्थानि न हि संभवन्ति। तथा हि प्रमाणानि चत्वारि सन्ति। **प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि** (**न्यायसूत्रम्** ३)। न हि तावत् प्रत्यक्षं प्रमाणम्। प्रत्यक्षप्रमाणं हि द्विविधं - बाह्याभ्यान्तरभेदात्। न हि बाह्यप्रत्यक्षं तत्र प्रमाणम्, बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणत्वात् ईश्वरे च रूपत्वावच्छिन्नाभावात्। नाऽपि मानसप्रत्यक्षम्, स्वात्मभिन्नद्रव्यत्वात्। यतो हि परात्मनः परेण मनसा प्रत्यक्षवारणाय स्वात्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगत्वेनैव हेतुत्वस्य वक्तव्यतया, ईश्वरे च तस्याऽभावात्। नाऽप्यनुमानप्रमाणम्, ईश्वरस्य सदाऽप्रत्यक्षतया तस्य केनचिल्लिङ्गेन सहाऽदर्शनेन व्याप्तिग्रहासम्भवात्। न वोपमानं प्रमाणम्, ईश्वरतुल्यस्य कस्यचिदपि पदार्थस्याऽभावेन सादृश्यज्ञानासंभवात्। नाऽपि शब्दः प्रमाणम्, श्रुतीनामीश्वरोच्चरितत्वेन प्रामाण्यस्य वक्तव्यतयेदानीमीश्वर एव सन्देहेनेश्वरास्तित्वप्रतिपादकश्रुतीनामपि सन्दिग्धत्वात्; प्रमाणचतुष्टयं प्रत्येकं मिलित्वा वेश्वरं साधयितुमसमर्थं भवति। एवं च प्रमाणचतुष्टयेनाऽसिद्धभूतस्येश्वरस्य प्रणम्यत्वाभावात् सर्वत्र ग्रन्थादौ इष्टदेवनमस्कारात्मकमङ्गलकरणमप्ययुक्तमिति बहुधा वक्तारमीश्वरानङ्गीकर्तृपूर्वपक्षिणं प्रति धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु यं कमपि पुरुषार्थमर्थयमानानां पदार्थनिरूपणे प्रवृत्तानां साङ्ख्यवेदान्तादिसकलदर्शनसिद्धान्तानुयायिनां मते ईश्वरस्य लक्षणं प्रमाणं च प्रदर्शनपुरःसरमनुमानादिप्रमाणेन न्यायाभिमतेश्वरसिद्धिप्रक्रियां च निरूपयन्नाह **कुसुमाञ्जलिकारः** "इह यद्यपीत्यादिना। तथा च ईश्वरस्य लक्षणनिर्वचनप्रसङ्गे वेदान्तिनः प्राहुः शुद्धबुद्धस्वभाव ईश्वरः। आदिविद्वान् सिद्ध इति कापिलाः। क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः। लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः। शिव इति शैवाः। पुरुषोत्तम इति वैष्णवाः। पितामह इति पौराणिकाः। यज्ञपुरुष इति याज्ञिकाः। सर्वज्ञ इति सौगताः। निरावरण इति दिगम्बराः। उपास्यत्वेन देशित इति मीमांसकाः। लोकव्यवहारसिद्ध इति चार्वाकः। यावदुक्तोपपन्न इति नैयायिकाः।

किं बहुना ? यं कारवोऽपि विश्वकर्मेत्युपासते । तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं सुप्रसिद्धानुभावे भगवति सन्देह एव कुतः ?" (कुसुमाञ्जलि, पृ. ५) सन्देहाभावे न हि तत्र न्यायः प्रवर्तते । 'नाऽनुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते किन्तर्हि ? संशयितेऽर्थे' इति **भाष्य**वचनात् सन्देहे सत्येव न्यायः प्रवर्तते । परमात्मनः सर्ववादिसिद्धतया साध्यवत्तानिश्चयेन संशयस्य निवर्त्यत्वात् इत्यपि वक्तुं न युज्यते । यतो हि शास्त्रान्तरेण सिद्धेऽपि परमात्मनि सत्यामनुमित्सायां अनुमानादिप्रमाणेनेशस्य मननावश्यकतयाऽनुमानप्रमाणादिसमुपस्थापनेन मननरूपोपासनैव क्रियते । तथा चोक्तं **श्रीमदुदयनचार्यैः** –

**न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।**
**उपासनैव क्रियते श्रवणानन्तरागता ॥ (न्यायकुसुमाञ्जलि १/३)**

एवं च 'प्रत्यक्षेण परिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः' (**जागदीशी पक्षता**, पृष्ठ. ५६) इति **वाचस्पति**वचनस्याऽपि सङ्गतिः सङ्गच्छते । अत एवेश्वरविषयकानुमानप्रमाणान्युच्यन्ते पञ्चमस्तबके –

**कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।**
**वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥ (न्यायकुसुमाञ्जलिः ५/१)**

एभिर्नवभिर्हेतुभिर्विश्वविदव्ययः साध्य इत्यन्वयः ।

## २. ईश्वरसाधकहेतूनां विचारः

### २.१ कार्यहेतुकानुमानविचारः

अत्र कारिकायां कार्यपदं हेतुपरं तस्य च तादात्म्यसंबन्धेन विवादात् धर्मपरतया व्याचष्टे । तथा च क्षितिः सकर्तृका कार्यत्वाद् घटवदित्यनुमानेन क्षितिः सकर्तृकत्ववती इत्यनुमितिर्जायते । नन्वत्राऽनुमितिर्द्विधा प्रसिद्धा अवच्छेकावच्छेदेनाऽनुमितिः सामानाधिकरण्यरूपानुमितिश्च । तथा हि, यत्र उद्देश्यतावच्छेदकव्यापकत्वं विधेये विधेयप्रतियोगिकसंसर्गे वा भासते सा ह्यनुमितिरवच्छेदकावच्छिन्नरूपा । यत्र च पक्षतावच्छेदकसामानाधिकरण्येनाऽनुमितिर्जायते साऽनुमितिः सामानाधिकरण्यरूपा । यथा पर्वतो वह्निमान् धूमादित्यत्र यदा उद्देश्यतावच्छेदकपर्वतत्वव्यापकत्वं वह्नौ वह्निप्रतियोगिकसंयोगसंसर्गे च भासते तदा अवच्छेदकावच्छेदेनानुमितिरुच्यते । यदा तु पक्षतावच्छेदकीभूतपर्वतत्वसामानाधिकरण्येन पर्वतैकदेशे साध्यानुमितिर्जायते तदा सामानाधिकरण्यरूपानुमितिः । नन्वत्र कीदृशाऽनुमितिर्विवक्षिता ? यदि च क्षितित्वसामानाधिकरण्येन सकर्तृकत्वं साध्यं तदा घटादौ साध्यस्य सिद्धत्वेऽंशतः सिद्धसाधनम् । तत्र यदि पूर्वोक्तदोषनिवारणाय जन्यक्षितित्वावच्छेदेन सकर्तृकत्वं साध्यते तदा परमतेऽजन्यक्षितेरप्रसिद्धत्वात् जन्यपदव्यावृत्त्यसिद्धिः । जन्यत्वस्यैव पक्षतावच्छेदकत्वसंभवे पक्षतावच्छेदककोटौ क्षितित्वनिवेशस्य व्यर्थत्वाच्च । ननु तर्हि जन्यत्वमेव पक्षतावच्छेदकमस्तु तथा सति पक्षतावच्छेदकहेत्वोरैक्यप्रसङ्ग इत्यपि न, स्वरूपसंबन्धविशेषरूपकार्यत्वस्यैव पक्षतावच्छेदकत्वात्, प्रागभावप्रतियोगित्वरूपकार्यत्वस्य हेतुत्वेन तयोर्भेदात् । अत्र साध्यं सकर्तृकत्वं, तच्चोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम् । यथा घटस्योपादानं (समवायिकारणं) कपालद्वयं तद्विषयकप्रत्यक्षज्ञान-चिकीर्षाकृत्येतत्त्रयं, तद्वान् कुलालः कर्ता भवति तथा क्षितेरुपादानं समवायिकारणं

परमाण्वादयस्तद्विषयकप्रत्यक्षज्ञानचिकीर्षाकृतिमानीश्वरः, स एवाऽस्य जगतः कर्ता भवतीत्याशयः । अत्र चाऽनुमानेन सर्गाद्यकालिकक्षितेः कृतिजन्यत्वे सिद्धे तादृशकृतिः द्रव्याश्रिता गुणत्वात् रूपवद् इत्यनुमानेन द्रव्याश्रितत्वे साधिते, तादृशकृतिः न पृथिव्यादिद्रव्यवृत्तिः, चेतनगुणत्वात्, न जीवात्मवृत्तिः, नित्यकृतित्वाद् इत्याद्यनुमानेन द्रव्यान्तरस्य बाधात् तादृशकृतिर्जीवात्मसहितपृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिता पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादिति परिशेषानुमानेन द्रव्यान्तरस्य बाधात् तादृशकृत्याश्रयतयेश्वरसिद्धिः । अत्र कृतिजन्यत्वपदेनोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिप्रयोज्योत्पत्तिमत्त्वं विवक्षितम् । कार्यं प्रत्युपादानज्ञानत्वादिप्रत्येकधर्मेण कारणत्वेऽपि कार्योत्पत्तौ सामग्रीत्वेन प्रयोजकत्वात्, प्रत्येकधर्मावच्छिन्नप्रयोजकता-निरूपितप्रयोज्यत्वस्योत्पत्तौ विरहात् । यदि च कार्यमात्रे कृतित्वेनैवाऽन्वय-व्यतिरेकाभ्यां ज्ञानत्वेनेच्छात्वेन वा हेतुत्वं स्वीक्रियते तदा तादृशज्ञानजन्यत्वं कृतिजन्यत्वमिच्छाजन्यत्वं वा साध्यमस्तु ।

वस्तुतस्तु कृतिजन्यत्वमेव विशेष्यतासंबन्धावच्छिन्नकृतित्वावच्छिन्नकारणतानिरूपित-समवायसंबन्धावच्छिन्नकार्यत्वं साध्यम्, यत्र परमाणौ विशेष्यतासंबन्धेन कारणं कृतिस्तिष्ठति तत्र समवायसंबन्धेन द्व्यणुकं कार्यं वर्तते । तथा च समवायसंबन्धेन द्व्यणुकं प्रति विशेष्यतासंबन्धेन कृतिः कारणमिति कार्यकारणभावश्च बोध्यः । तेनाऽस्मदादिकृतेर्विशेष्यतासंबन्धेन परमाणौ वृत्तित्वाभावात् अदृष्टद्वाराऽस्मदादिकृतिजन्यत्वमादाय न सिद्धसाधनम् । एवं च कार्यं विशेष्यत्वसंबन्धावच्छिन्नकृतित्वावच्छिन्नजनकतानिरूपितजन्यतावद् प्रागभावप्रतियोगित्वाद् इत्यनुमानं फलितम् । ध्वंसे समवायसंबन्धावच्छिन्नजन्यतावत्त्वरूपसाध्यस्याऽभावाद् बाधः तन्निवारणाय सत्त्ववैशिष्ट्यं जन्यत्वे विशेषणम्। एवं च साध्याभाववद्वृत्तित्वस्य ध्वंसे सत्त्वाद् व्यभिचारवारणाय सत्त्ववैशिष्ट्यं प्रागभावप्रतियोगित्वविशेषणम् । यद्यप्यत्र मुक्तावल्यां प्रसिद्धटीकाकार-**दिनकरभट्ट**महोदयेन कार्यमात्रस्य ईश्वरीयकृतिजन्यत्वप्रवादमभ्युपेत्य कृतिजन्यत्वमात्रसाध्यं विधायोभयत्र सत्त्ववैशिष्ट्यं विशेषणं निरपेक्ष्यैव बाधव्यभिचारयोरभावः प्रदर्शितः । एवं चाऽस्मदीयहविर्गोचरकृतिजन्यत्वमादाय सिद्धसाधनवारणायाऽदृष्टाद्वारकत्वेन कृतिजन्यत्वं विशेषणीयमिति प्रोक्तम् । इत्थं चाऽनुमानप्रमाणेन साधिते ईश्वरे ईश्वरोच्चरितत्वेनैवाऽऽगमस्यापि प्रामाण्यात् "द्यावाभूमी जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता" (शुक्लयजुर्वेदः १७/१९) इत्याद्यागमेनाऽपि परमेश्वरोऽनुसन्धेयः ।

## २.२ आयोजनहेतुकानुमानविचारः

आयुज्यते संयुज्यते अनेनेति व्युत्पत्त्या - आङ्पूर्वकाद् युज्धातोः ल्युटि आयोजनं कर्म, तथा च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म प्रयत्नवदात्मसंयोगजन्यं, कार्यारम्भकसंयोगजनककर्मत्वात्, अस्मदादिशरीरकर्मवद् इत्यनुमानेन तादृशप्रयत्नवत्त्वेनेश्वरसिद्धिः । अत्राऽप्यागमः -

**यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।**
**यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥**
**अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः ।**
**ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव च ॥** (महाभारत, वन० ३०/२१)

**मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।**

**तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥** (गीता, ९/१९)

**२.३ धृतिहेतुकानुमानविचारः**

धृतिश्चाऽत्र गुरुत्ववतां पतनाभावः । तथा च ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृतकाष्ठवद् इत्यनुमानेन तादृशधृतिमत्त्वाश्रयतयेश्वरसिद्धिः । अत्राऽप्यागमः -

**एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः ।** (बृ. आर. उप. ५/७/७)

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।**

**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥** (गीता, १५/१७) ।

**२.४ नाशहेतुकानुमानविचारः**

अत्राऽऽदिपदाद् नाशादिपरिग्रहः । तथा च ब्रह्माण्डादि द्व्यणुकपर्यन्तं जगत् प्रयत्नवद् विनाश्यं, विनाश्यत्वात् पाट्यमानपटवत् । अत्राऽप्यागमः -

**सर्वभूतानि कौन्तेय ! प्रकृतिं यान्ति मामिकाम् ।**

**कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥** (गीता, ९/७) ।

**२.५ पदहेतुकानुमितिविचारः**

पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति व्युत्पत्त्या पदं व्यवहारः एवोच्यते । अतोऽपीश्वरसिद्धिः । तथाह्यनुमानम् - पटादिसंप्रदायः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात्, आधुनिकलिप्यादिव्यवहारवत् । अत्र संप्रदायनिर्माणपरंपरा एव व्यवहारः । तथा च सर्गादौ इतरबाधादीश्वरसिद्धिः । अत्राऽप्यागमः -

**पितामहस्य जगतो माता धाता पितामह ! ।**

**यदि ह्यहं न वर्तेय जातु कर्मण्यतन्द्रितः ॥**

**मम वर्त्माऽनुवर्तन्ते मनुष्याः पार्थ ! सर्वशः ।**

**उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ॥** (गीता, ३/२३-२४) ।

**२.६ प्रत्ययहेतुकानुमानविचारः**

प्रत्ययतोऽत्र प्रामाण्यम् - तथा हि सर्गाद्यकालीनवेदवेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात्, लौकिकवाक्यजन्यशाब्दप्रमावद् इत्यनुमानेनापि सर्गादावितरवक्तृबाधादीश्वरसिद्धिः ।

**२.७ श्रुतिहेतुकानुमानविचारः**

वेदत्वं चाऽत्र - अनुपलभ्यमूलान्तरत्वे सति महाजनपरिगृहीतवाक्यत्वम् । तथा हि वेदः सर्वज्ञप्रणीतो वेदत्वात्, यन्नैवं तन्नैवं यथा रघुवंशादिः ।

## २.८ वाक्यहेतुकानुमितिविचार:

वाक्यत्वहेतुनाऽपीश्वरसिद्धि: । तथा हि, वेदवाक्यानि पौरुषेयाणि वाक्यत्वात्, अस्मदादिवाक्यवत् । तथा च वाक्यत्वावच्छेदेन पौरुषेयत्वस्य साध्यतया वेदेऽपि पौरुषेयत्वसिद्धि: ।

## २.९ सङ्ख्याहेतुकानुमानविचार:

सङ्ख्याविशेष: परमाणोर्द्वित्वम् । तथा ह्यनुमानं - द्व्यणुकपरिमाणं सङ्ख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात्, तुल्यपरिमाणककपालद्वयारब्धपरिमाणात् प्रकृष्टतादृशकपालत्रयारब्धपरिमाणवत् । तत्र परिमाणं तावत् त्रिविधं — परिमाणजं, सङ्ख्याजं, प्रचयजन्यं च । उक्तं च मुक्तावलीकारेण "सङ्ख्यात: परिमाणाच्च प्रचयादपि जायते" (कारिकावली, १११) । यथा घटपरिमाणं प्रति कपालपरिमाणं कारणं न तथा द्व्यणुकपरिमाणं प्रति परमाणुपरिमाणं, परिमाणस्य हि स्वसमानस्वसजातीयोत्कृष्टपरिमाण-जनकत्वनियमात् । तत्र द्व्यणुकपरिमाणं प्रति परमाणुगतद्वित्वसंख्या कारणम्, अणुपरिमाणस्याऽकारणत्वात् । "अत एवोक्तं - पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्" (**कारिकावली, ११**) । एवं च सर्गादौ द्व्यणुकपरिमाणहेतु-परमाणुपरिमाणनिष्ठद्वित्वसङ्ख्या नाऽस्मदाद्यपेक्षाबुद्धिजन्या, सा यदीयापेक्षाबुद्धिजन्या स एवेश्वर: । एतेषां हेतूनामुपस्थापनेनाऽनुमानप्रमाणेन साधिते ईश्वरे तदुच्चरितत्वेन वेदस्याऽपि प्रामाण्यनिश्चयात् - "द्यावाभूमी जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता" इत्याद्यागमेनाऽपि ईशसिद्धि: ।

# ३. निष्कर्ष:

एतावता प्रबन्धेन शास्त्रेभ्य ईशस्य श्रवणानन्तरं मननपुर:सरं श्रुत्योपदिष्टविधिना निदिध्यासनेनाऽदृष्टद्वारा स्वात्मसाक्षात्कारद्वारा वा चरमदु:खध्वंसरूपो मोक्षो जायते । परमात्मनोऽखिलागमसञ्चरणशीलत्वात् मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्याऽपि मोक्षोपयोगित्वं सिद्धम् । उक्तं च -

**आगमेनाऽनुमानेन ध्यानाभ्यासरसेन च ।**
**त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥** (योगदर्शनम् ८/२४)

तत्राऽपि न्यायशास्त्रस्य प्रदीपवत् सर्वविद्यानां प्रकाशत्वेन सर्वशास्त्रोपकारकत्वं च निर्वहति । एवं च "तमेव विदित्वाऽतिमृत्युमेति, नाऽन्य: पन्था विद्यतेऽयनाय" इति श्रुत्या साधनान्तरनिषेधाच्च ज्ञानमेव मोक्षसाधनं सिद्धमिति दिक् ।

# सन्दर्भग्रन्थसूची

१. उदयनाचार्य:, **न्यायकुसुमाञ्जलि** (ई.सं. १९९७), वाराणसी : चौखम्बासुरभारती प्रकाशनम् ।

२. भट्टाचार्य:, विश्वनाथ:, **न्यायसिद्धान्तमुक्तावली** (वि.सं. २०६१), वाराणसी : चौखम्बासंस्कृत-संस्थानम् ।

३. सूरि:, हरिभद्र:, **षड्दर्शनसमुच्चय:** (ई.सं. १९७०), सम्पा. महेन्द्रकुमार जैन:, वाराणसी : भारतीय ज्ञानपीठम् ।

४. व्यासः, **श्रीमद्भगवद्गीता** (वि.सं. २०६७), शतषष्ठ्युत्तरशतं संस्क., गोरखपुर : गीताप्रेस ।
५. व्यासः, **महाभारतम्** (वि.सं. – २०२५), तृतीय संस्क., गोरखपुर, गीताप्रेस ।
६. **बृहदारण्यकोपनिषद्** (सन् १९५३), सम्पा० काशीनाथ शास्त्री, पुणे : आनन्दाश्रममुद्रणालयः ।
७. **शुक्लयजुर्वेद-संहिता** (वि.सं. १९७१), सम्पा० जगदीशलाल शास्त्री, दिल्ली : मोतिलाल बनारसीदासः ।
८. गौतमः, **न्यायसूत्रम्** (सन् १९७९). मुंबई : गुजरातीमुद्रणालयः ।
९. सूरिः, हरिभद्रः, **योगदर्शनम्** (वि. सं. २०६५), अहमदावाद : राजेन्द्रसूरिग्रन्थमाला ।
१०. तर्कालङ्कारः, जगदीशः, **पक्षता** (वि. सं. २०३६), द्वितीय संस्क., वाराणसी : चौखम्भासंस्कृतसंस्थानम् ।
११. सायणः, माधवाचार्यः, **सर्वदर्शनसंग्रहः**, पुणे : भाण्डारकर इन्स्टीट्यूट ।

– नेपालसंस्कृतविश्वविद्यालयः
काष्ठमण्डपः, नेपालदेशः

# पत्रम्

- मुनिधर्मकीर्तिविजयः

॥ नमो नमः श्रीगुरुनेमिसूरये ॥

आत्मीयबन्धो ! चेतन !

धर्मलाभोऽस्तु ।

अत्र सातं वर्तते । तत्राऽप्येवं स्यादित्याशासे ।

पूज्यपाद शासनसम्राट्-गुरुभगवतां प्रबलपुण्यपुञ्जेन पवित्रतायां मधुपुरी(महुवा)नगर्यां सानन्दं चातुर्मासं समाप्य सूरतनगरं प्रति विहृतवन्तो वयं सर्वेऽपि ।

बन्धो ! किं नाम जीवनम् ? जीवनस्य साफल्यं किम् ? - इत्यादयः प्रश्ना निरन्तरं मनस्युद्भवन्ति । प्रभाते सति उत्थितं, स्नानं कृतं, क्षणं प्रभुनाम स्मृतं, आदिनं वाणिज्यक्षेत्रे प्रसन्नमनसा सहृदयं च पापं सेवितं, आपणेऽपि अज्ञजनैः सह वञ्चनाऽनीतिश्चाऽऽचरिता, अनकैर्जनैः क्लेशो विहितः, भोजनं कृतं, रजन्यां सपरिवारं क्रीडाङ्गणे गतम्, अन्ते, दूरदर्शनं दृष्ट्वा शयनं कृतं च; प्राय एषाऽस्ति जीवानां दिनचर्या ।

भो ! धनस्योपार्जनं करणीयम् आदिनं चाऽऽनन्दः करणीयः - किमेतदेव जीवनस्य साफल्यं ? जीवनस्य सार एष एव ?

नैषः जीवनसारः । परमेश्वरानुग्रहादतिदुर्लभो मानवभवः प्राप्तो जीवेन । प्राप्तस्य दुर्लभमानवभवस्य सदुपयोगः कीदृशः कृतो जीवेन ? एषा धनस्य बन्धुवर्गस्य चाऽऽसक्तिस्त्वन्यभवेऽपि जीवेन कृता । यदि नाऽत्र मानवभवस्य सदुपयोगः क्रियते तर्हि जीवेनाऽनन्तकालपर्यन्तं दुर्गतिषु भ्रामं भ्राममेषाऽऽसक्तिः सदाऽऽसेवनीयैव । तत्र दुःखं विना न किमपि प्राप्यते जीवेन । तस्मिन् काले तत्र न कोऽपि त्वां रक्षिष्यत्युपदेक्ष्यति वा । अत एवाऽस्मिन् भवे जीवनस्य सारः कः ? इति सूक्ष्मधिया चिन्तनीयम् ।

चेतन ! एतावद्वर्षाणामनन्तरमपि किं स्वभावस्य परिवर्तनं जातम् ? प्रतिपदमावेशक्लेशमनुसरता त्वया काचिदपि शान्तिः प्राप्ता ? सर्वदा प्रपञ्चकरणे एव रममाणे मनसि सारल्यं जागृतं किम् ? प्रतिक्षणमन्येषां हीनवचनप्रयोगेऽशुभकरणे च व्याप्रियमाणं वचनं वपुश्च संमार्जितं किम् ? अनेकदुष्टविकल्प-दुर्ध्यानैः परिवेष्टितचित्तस्य शुद्धिर्जाता काचित् ? तव मुखान्निर्गच्छन्ति वचनानि कोमलानि सन्ति उत कठोराणि ?

अस्माकं व्यवहार-स्वभाव-मनोवचोवपुर्योगादीनां शुद्धिः करणीया, एष एव सारोऽस्ति जीवनस्य। भो! धनस्य परिवारस्याऽद्यतनसाधनस्य च वृद्धिः, प्रतिष्ठायाश्च प्राप्तिः सरला शक्या चाऽस्ति, किन्तु नैष जीवनस्य सारोऽस्ति। एतादृशी भौतिकवृद्धिस्तु कुख्यात'दाउदे'नाऽपि प्राप्ता, एवमनेकैर्जनै राजकीयनेतृभिश्चाऽपि संप्राप्ता। किं तेषां जीवनं सफलमुच्यते ? नैव। बाह्य-भौतिकवृद्ध्या न कदाऽपि जीवनं सफलं भवति। एवं यया यया वृद्ध्याऽऽत्महानिः सद्गुणह्रासो दुर्गुणवृद्धिश्च भवेत्, सा कथं वृद्धिः कथ्यते ?

किञ्च, अनाथजनानां पीडितजनानां च साहाय्यं करणीयम्, तेषां दुःखं दूरीकर्तुं प्रयतनीयम्, केषाञ्चिदपि जनां कस्मिमन्नपि कार्ये विघ्नो न करणीयः, सर्वेषामपि शुभार्थं मङ्गलार्थं चैव प्रयत्नः करणीयः, इत्येव जीवनस्य सारोऽस्ति, एतदेव जीवनस्य साफल्यं च ज्ञेयम्। भगवद्दृष्ट्या त्वेष एव श्रेष्ठो धर्मोऽस्ति। लोकेऽपि परोपकारो धर्मः, पीरपीडनं चाऽधर्मः प्रोच्यते। वस्तुतो धर्म एव जीवनस्य सारो न त्वधर्मः, यतो धर्मेणैव स्वभाव-व्यवहारादिशुद्धिरवाप्यते।

अस्माभिः किं क्रियते - धर्म उताऽधर्मः ? धर्मो धर्मस्थानके करणीयः पदार्थोऽस्ति, इति भ्रमवशाद् धर्मस्थानके यत्किमपि विधीयते तद् धर्मत्वेन कथ्यते। ततोऽस्माकं जीवनेऽधर्म एव वृद्धिङ्गतो जातः। वर्तमानकालीनां परिस्थितिं पश्य - जनो धर्मस्थानके यावत्कालं वसेत् तावत् स धर्मं कुर्यात्, किन्तु बहिर्गत्वा धर्मेण सह तस्य न कोऽपि सम्बन्धोऽस्ति, तत्र तु किमपि कर्तुं शक्तः, इति प्रतिभासते। अद्य धर्मस्थानके बहुकालं वसन् सदा धर्मक्रियायां रममाणो जनश्चाऽपि व्यवहारेऽनीतिं प्रपञ्चमसत्यभाषणं वञ्चनं शोषणं लुण्टनं परपीडनमतिपरिग्रहमप्रामाणिकतां चेत्यादिकं सर्वमपि सानन्दं सहृदयं च करोति, तथाऽपि स जनो धर्मी पुण्यात्मा चोच्यते। यतो धर्मस्थानके स विशेषधर्मक्रियाकरत्वेन समाजे प्रसिद्धो जातो धर्मित्वेन।

भो ! धर्मस्य सम्बन्धो न धर्मक्रियया सह, अपि तु मनसः शुद्धपरिणत्या, निर्मलाध्यवसायेन, शुभभावनया च सहाऽस्ति। धर्मो न मन्दिरे, उपाश्रये, तपसि, क्रियायां चाऽस्ति, किन्तु जीवनशुद्धौ व्यवहारशुद्धौ वर्तनशुद्धौ स्वभावशुद्धौ च विद्यते। धर्मस्तु जीवनस्य प्रत्येकस्मिन् व्यवहारे आचरणीयोऽस्ति। अत एव मयोक्तम् - धर्म एव जीवनस्य सारः।

'आल्बर्ट स्वाइट्झर' महोदयेन प्रोक्तम् - यो धर्मो जीवनं प्रति समादरं न कुर्यात् स धर्म एव नास्ति।

नेपोलियन बोनापार्टः उवाच - जनो न यं कमपि धर्मं समाचरेत्, तथाऽपि तस्य जीवनं नीतिमयं संभवेत्। यो जनो नीति-प्रमाणिकता-सारल्यादिगुणान् मानवतां चाऽङ्गीकुर्यात्, स न कदाऽप्यधार्मिको भवेत्।

चेतन ! मानवीयगुणानां विकासं विनाऽऽत्मिकगुणविकासरूपो धर्म एव न संभवति। भगवता कृतायाः -

**'शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः।**
**दोषाः प्रयान्तु नाशं सर्वत्र सुखीभवन्तु लोकाः ॥'**

इति प्रार्थनायाः कोऽर्थः ? एतया प्रार्थनयाऽपि ज्ञायते धर्मः कः - इति। वीरप्रभुणा स्वजीवने प्रथमं मानवीयगुणानामेवाऽऽलम्बनं कृतम्। तथाऽपि बहुशो जीवाः शोषण-वञ्चना-अनीति-परिग्रहादिकं विधाय

धनोपार्जनार्थमेव जीवनं गमयन्ति । धनादिषु प्रगाढासक्तिर्नोचिता । अर्धमामाचर्य प्राप्तेषु धनादिषु अधर्मरूपाऽऽसक्तिस्तु महानर्थरूपा ज्ञेया । एतत्सर्वं ज्ञात्वाऽपि जीवैः जीवनस्याऽऽसाररूपस्य क्षणिकवस्तुन एव विशेषासक्तिर्विधीयते । 'सर्वमपि क्षणिकमनित्यं चाऽस्ति' इति जीवैर्बहुशः श्रुतं पठितं ज्ञातं च, तथाऽप्यनादिकालस्य तीव्रवासनावशेन जीवैः कथनमेतन्न कदाऽपि स्वीकृतम् । देव-गुरुपूजनं, तदुपदेशं च विहायाऽऽजीवनमादिनं च तत्तद्व्यक्तेश्च आसक्तिरेव कृता । एवमेव दुर्लभं जीवनं व्यतीतमस्ति ।

जीवैर्येषु येषु वस्त्वादिष्वासक्तिः क्रियते तानि सर्वाणि कियन्ति क्षणिकान्यनित्यानि चेति सर्वैरपि जीवैरनुभूतानि खलु । इदानीं 'मोदी'महोदयेन ५००-१००० इति चलद्रूप्यकाणामुपरि प्रतिबन्धः कृतः। अद्याऽनेकेषां जनानां गृहं कर्गजेन भृतं जातम् । अनेकेषां पीडितजनानां दुःखिजनानां परवशजनानां च दीनतां परवशतां च ज्ञात्वाऽपि तेषां वञ्चन-शोषण-चौर्य-अनीत्यादिहीनकृत्यं च विधाय प्राप्तधनाः श्रेष्ठिनोऽद्य किङ्करा जाताः । अनेके धनासक्ता धनाढ्याश्च ग्लानवदनाः सञ्जाताः । धनमेव सर्वस्वं जीवनसारं च, धनेनैव सर्वं प्राप्यते - इति मिथ्याभ्रमे रममाणैः सर्वैर्जीवैः 'जीवनस्य कः सारः' इति ज्ञातमेव । मम भगवता पुरा यदपि कथितं तत् सर्वमपि सत्यं यथार्थं चाऽस्ति, तदद्य सर्वैरपि अनुभूतम् । अद्य महावीरविभोः दूरदर्शिता स्मृतिपथमायाति । तेन भगवता तस्मिन् काले प्ररूपिताः सिद्धान्तः वर्तमानकाले कियन्त उपयुक्ताः सन्ति, इति चिन्तनीयमस्ति ।

बन्धो ! गृहसुखं परिवारसुखं राजसुखं चेति सर्वमपि संसारसुखं संत्यज्य वर्धमानेन यौवनकाले संयमः (श्रमणधर्मः) स्वीकृतः । एकाक्येव भयङ्करे गहने च वने गतवान् । तत्र सुदुस्त्यजं शरीरमोहमपि विहायाऽऽत्मसाधना कृता । भगवता घोरातिघोरोपसर्गाः सोढाः, आचरितं तीव्रं तपश्च । एवं विहरता भगवता मोहनीयादिकर्मचतुष्टयं विनाश्याऽनन्तं केवलज्ञानं प्राप्तम् । तदा देवैः रत्नसुवर्णरूप्यमये विरचिते समवसरणे भगवता देशना दत्ता ।

वीरविभुना द्विधा धर्मो निरूपितः । तत्राऽऽदौ सर्वविरतिधर्मः (श्रमणधर्मः) प्ररूपितः । यो जीवस्तद्धर्मं ग्रहीतुमशक्तोऽस्ति तदर्थं देशविरतिधर्मः (श्रावकधर्मः) कथितः । तत्र कथितं - पदार्थानामुपभोगः संग्रहश्च संसारिजीवानां कृते आवश्यकोऽस्ति, तदर्थं च धन-साधनादिकमप्यावश्यकमस्ति । ततो जीवः पदार्थानामुपभोगं संग्रहं च करोत्येव, तत्र न दोषः, किन्तु पदार्थानामुपभोगस्य प्रगाढवासनाऽनियन्त्रितासक्तिश्च महापापरूपाऽस्ति, इति ।

शास्त्रेषु धन-वस्तूनां संग्रहो न परिग्रहः कथितः, किन्तु तेषां पदार्थानामुपरि मूर्च्छा-आसक्तिः परिग्रहः प्रोच्यते ।

श्रीउमास्वाचिवाचकेन तत्त्वार्थसूत्रे उक्तम् - **मूर्च्छा परिग्रहः** ।

भोः ! वीरभगवतः कामदेवादयो दश श्रावका आसन्, इत्युक्तं शास्त्रेषु । तत्र कृतं तेषां समृद्धीनां वर्णनं ज्ञातमेव त्वया । परिग्रहदृष्ट्या तु ते सर्वेऽपि महापरिग्रहधारिण आसन्, तथाऽपि ते महाश्रावका उच्यन्ते ।

यतस्तेषां चित्ते मूर्च्छा-आसक्तिर्नाऽऽसीत्। एषाऽनियन्त्रितासक्तिरेव क्लेशस्य विद्रोहस्य युद्धस्य च मूलमस्ति। ततो मे भगवता पुरा श्रावकधर्मनिरूपणे जीवनोपयोगिपदार्थानां परिग्रहस्य भोगोपभोगस्य च निषेधो न विहितः, किन्तु विविधनियमरूपेण प्रतिनियतमर्यादा निश्चिता। एतदेव वैशिष्ट्यं वीरभगवतः सूक्ष्मदृष्टेरस्ति।

एवं व्यवहारशुद्धेः साधनशुद्धेश्च विशेष आग्रहः कृतो भगवता। यत्र साधनशुद्धिरस्ति तत्र स्वयं परिग्रहस्य मर्यादाऽऽगच्छत्येव। साधनशुद्धिः स्वच्छन्दताया अधिकसञ्चयकरणवृत्तेर्निरङ्कुशेच्छायाश्चोपरि प्रतिबन्धकरूपा भवति तथैव व्यापारकरणे शुभवस्तु दर्शयित्वाऽशुभं देयं, मलिनवस्तुना सह मिश्रणं करणीयं, न्यूनं देयं, विविधप्रकारं करचौर्यं करणीयं, स्वयं चौर्यं कार्यमुत चौरस्य साहाय्यं देयम् - एतत्सर्वं पापं निरोधयत्येषा साधनशुद्धिः। अत एवाऽऽदौ भगवता परिग्रहपरिमाणं साधनशुद्धिश्च प्रदर्शिता। भगवत एषा दीर्घदृष्टिः सत्यदर्शिता च वन्दनीयाऽस्ति। विभुना 'जीवानां सामान्यजीवने न काऽपि बाधा स्यात् स्वजीवनं सानन्दं निर्बन्धतया व्यतीतं भवेत् इति मनसिकृत्यैव धर्मः प्ररूपितोऽस्ति।

एतेन ज्ञायते - जैनधर्मो न शुष्को नीरसः सङ्कुचितश्च। एष धर्मस्तु सार्वजनीनः सर्वजनोपयोगी संप्रदायनिरपेक्षश्चाऽस्ति। यः कोऽपि जन एतद्धर्ममाराध्याऽऽत्मकल्याणं कर्तुं शक्तोऽस्ति, यतोऽत्र न क्रियया ज्ञात्या सह कुलेन च सह धर्मसम्बन्धोऽपि तु मनसः शुद्ध्या सह सम्बन्धो विद्यते। एतादृशी उदारताऽसङ्कुचितता च कुत्र दृश्यते ?

बन्धो ! साधनशुद्ध्यर्थं भगवतोक्तं - धर्मो न्यायसंपन्नवैभवेनैव (धनेनैव) करणीयः। एतत्कथनं वर्तमानकालीनसंदर्भेऽतीवोपयोग्यस्ति। अद्य धर्मक्षेत्रेष्वपि सर्वत्रो धनस्यैव प्रभुत्वं दृश्यते। धनप्रभावेन सहजधर्मस्तु ग्लान एव जातः, अथवा स त्वदृश्यत्वमेव गतवान्। धर्मस्य व्याजेनाऽनावश्यकधनव्ययो चिन्ताप्रेरकोऽस्ति। धनप्रभावेनाऽद्य प्रसिद्धिराडम्बरो दम्भः प्रतिस्पर्धाऽभिमानः प्रपञ्चश्चेत्यादिकं दूषणं धर्मक्षेत्रे प्रविष्टं जातम्। एतद्दूषणानि धर्मस्याऽङ्गरूपेणैवाऽद्य प्रतिभान्ति। शासनप्रभावनायाः कृते आडम्बर आवश्यकोऽस्ति, किन्तु तत्र विवेकोऽत्यावश्यको विद्यते। अधुना शासनप्रभावना बह्वी भवति। तत्र स्वप्रसिद्धिर्महत्त्वाकाङ्क्षाऽभिमानः शासनमालिन्यं चेति दुर्गुणा अपि बहवो दृश्यन्ते, किन्तु विवेकस्य त्वनुपस्थितिरेवाऽस्ति। यदि भगवत्कथनं सर्वैः स्वीकृतं स्यात्तर्हि धर्मस्यैतादृश्यवमगतिस्तु नैव स्यात्। अस्माभिरनीतिर्नाऽऽचरणीया, साधनशुद्धिः करणीया, परिग्रहो न विधेयश्चेति वीरकथनं न स्वीकृतं न चाऽऽचरितं किन्तु सर्वकारस्य वचनमनिच्छयाऽप्यङ्गीकृतमेव, तथाऽप्येष धर्मो न प्रोच्यते। घटनैषा वैराग्यप्रेरिका बोधदायिका चाऽस्ति। यदि मनो जागृतं स्यात्तर्हि संसारस्य पदार्थस्य च क्षणिकताया अनित्यतायाश्च भानं भवत्येव। पङ्क्तिरेका स्मर्यते -

**यत् प्रातस्तन्न मध्याह्ने।**

अस्मिन्नसारे संसारे धर्ममृते न किमपि सारभूतं शाश्वतं नित्यं चाऽस्ति। तथाऽप्येष जीवो धन-प्रतिष्ठा-परिवारादिप्राप्त्याऽभिमानं करोति। तदभिमानवशेन तस्य वर्तनं व्यवहारश्चाऽप्यौद्धत्ययुतौ भवतः। एतत्सर्वमनुचितमस्ति। यदि धनेनोन्मत्तीभूता अनेके राजानः श्रेष्ठिनश्चाऽपि यमदेवेन वशीकृताः स्युस्तर्हि भो! अस्माकं किं मूल्यम् ?

बन्धो ! विद्वान् मालवाधिपो भोजराजः स्मर्यते ।

एकदाऽपगतनिद्रः संप्राप्तधन-स्वजन-विशालप्राणिवर्गः स स्वप्रासादस्य चन्द्रशालायामितस्ततोऽटति स्म । "मम समीपेऽनुकूलाः स्वजनाः सन्ति, मम निकटे विपुला सम्पत्तिरस्ति, दन्ति-तुरङ्गमानां विशालो वर्गोऽस्ति, एवं सर्वस्वमपि मम समीपे अस्ति । अहो ! मम सदृशोऽस्मिन् जगति कः सुखी स्यात् ? इति चिन्तयन् स वदति स्म–

**चेतोहराः युवतयः स्वजनोऽनुकूलः**

**सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।**

**वल्गन्ति दन्तिनिवहास्तरलास्तुरङ्गाः**

इति त्रीणि पदानि पुनः पुनर्वदति स्म, किन्तु चतुर्थी पङ्क्तिर्न स्फुरति स्म । तदैवैकः स्तेनस्तत्र चौर्यार्थमागतवान् । तेनैतानि पदानि श्रुतानि । स स्तेनो विद्वान् आसीत्, ततो भयादिकं सर्वमपि विस्मृत्य स उक्तवान् - **संमीलने नयनयोर्न हि किञ्चिदस्ति ।**

चन्द्रशालायामटन् स राजा तच्छ्रुत्वैव चकितोऽभवत् । मध्यरात्रे कः स्यात् ? चौरोऽस्ति उत पण्डितः ? तेन पङ्क्तिः पूर्णीकृता, ततो मन्येऽहं, एष कोऽपि पण्डितोऽस्ति, इति निर्णीय तेनोक्तं - यः कोऽपि स्यात् स मे सम्मुखमागच्छतु ।

तदा स स्तेनः प्रकटोऽभवत्, तेन सर्वमपि कथितम् ।

राजा त्वतीव प्रसन्नो जातः । राज्ञा तस्मै स्तेनाय पुष्कलं धनं दत्तम् । स्तेनः गतवानन्यत्र ।

'संमीलने नयनयोर्न हि किञ्चिदस्ति' - एतद् वाक्यं राजा पुनः पुनः स्मरति । स्मरतस्तस्य मनस्यपि नश्वरताया बोधो जागृतः ।

चेतन ! नयनयोः मीलने सत्यस्माकं न किमप्यस्ति । यदर्थमाजीवनं रागद्वेषौ आचरितौ, तत्सर्वं धनादिकं क्षणिकं नश्वरं चाऽस्ति । केवलं धर्म एव शाश्वतोऽस्ति, धर्माराधनेन प्राप्तं पुण्यमेवाऽन्यभवे सहाऽऽगच्छति नाऽन्यत् किमपि !

**एक एव सुहृद्धर्मो मृतमप्यनुयाति यः ।**

**शरीरेण समं नाऽन्यत् सर्वमन्यत्तु गच्छति ॥**

अन्ते, सर्वकारेण क्षणिकं धनमथवा कालदेवेन क्षणिकमसारं च धनमायुश्च बलादागृह्येत, तत्पूर्वमेव यदि तदसारभूतस्य पदार्थस्य धर्मक्षेत्रे सानन्दं सदुपयोगं त्वं कुर्यास्तर्हि तत्सर्वं सफलीभवेत् ।

जीवनस्य सारो धर्म एव - इति ज्ञात्वा विशेषतस्त्वं धर्मं कुरु, इत्याशासे ।

# अर्धजरती (कथासङ्ग्रहः)

-कीर्तित्रयी

| | | |
|---|---|---|
| लेखकः | - | डा. विश्वासः |
| प्रकाशनवर्षम् | - | ऐसवीयं २०१७तमं वर्षम् |
| मूल्यम् | - | रू. ४५.०० |
| पृष्ठानि | - | ८ + ८८ |
| प्रकाशिका | - | संस्कृतभारती<br>अक्षरम्, ८ उपमार्गः, २ घट्टः, गिरिनगरम् - बेंगलूरु - ५६००८५ |

संस्कृतसम्भाषणान्दोलनस्याऽऽरम्भकालादपि संस्कृतभारतीसंस्था द्वारा संस्कृतवाणी सेवारतस्य डा. विश्वासमहोदयस्य नूतना साहित्यकृतिरियम् 'अर्धजरती'-त्यभिधः कथासङ्ग्रहः । अस्मिन् सङ्ग्रहे तेन विरचिता नव कथाः सङ्गृहीताः सन्ति । तासु काश्चन 'कथासरित्', 'संस्कृतप्रतिभा' -इति पत्रिकयोः पूर्वं प्रकाशिताः, अन्यास्त्वैदम्प्राथम्येनाऽत्र प्राकाश्यं नीताः सन्ति । कथानुक्रमश्चैवमस्ति - पुरस्काररहस्यम्, पुनरायान्महाकपिः, अर्धजरती, स्वामिपादानामन्तरङ्गम्, अनिमित्तबन्धुः, इदमुदाहरणम्, विधिलीला, दण्डशुल्कम्, स्वार्थः - इति । तत्र च तृतीयायाः 'अर्धजरती' त्यभिधायाः कथाया नाम्नाऽस्य सङ्ग्रहस्य नामाचरणम् 'अर्धजरती' इति कृतमस्ति ।

विश्वासमहोदयस्य कथाकथनशैली सरलाऽपि मर्मस्पृगस्ति । तदीयां शैलीमधिकृत्याऽऽधुनिकसंस्कृतसाहित्ये ऋषितुल्यस्य डा. राधावल्लभ-त्रिपाठीमहोदयस्य वचनानीमानि कानिचित् पठनीयानि - ''विश्वासेन कथायाः काऽपि स्वीया शैली विकासं नीता, यस्यां भाषा वस्तुनः सर्वथा सख्यं समाचरित । अस्य प्रत्येकं वाक्यं प्रत्येकं शब्दश्च सार्थको भवति । प्रत्येकं वाक्यं मनसि श्लिष्यति । सर्वाणि पदानि वर्णनीयं साक्षात्कारयन्ति । कथा स्वयं भारतवर्षस्य एकविंशशताब्द्याः समाजं नवीनाः पद्धतीश्च सविमर्शं परामृशति ।''

''संस्कृतकथा इतरासु भाषासु सम्प्रति विरच्यमानाभ्यः कथाभ्यो विशिष्यते विभिद्यते तत्साम्यमावहति

वेति प्रश्नानां समाधानं विश्वासस्य कथाः पाठं पाठं सञ्जायते। वस्तुतस्तस्य कथाः साम्प्रतिके साहित्ये इतरासु भाषासु विरचिताभिः श्रेष्ठाभिः कथाभिस्तुलनार्महन्तीति......"।

एतादृशस्याऽऽधुनिकासंस्कृतसाहित्यकारस्य तस्य दशाऽन्या अपि काश्चन कृतयः सन्ति यासु कथा-सङ्ग्रहः, उपन्यासौ, रूपकसङ्ग्रहौ, कन्नडभाषीयोपन्यासानां संस्कृतानुवादाः, प्रवासवर्णनं, भाषाकौशल-बोधनमित्यादिकाः कृतयः समावेशं प्राप्नुवन्ति। तत्राऽपि तेन 'मार्जालस्य मुखं दृष्ट'मित्यस्य लघुरूपक-सङ्ग्रहस्य कृते केन्द्रीयसाहित्यअकादम्याः २०१३तमवर्षीयो बालसाहित्यपुरस्कारः प्राप्तोऽस्ति, एस्. एल्. भैरप्पवर्यस्य 'आवरण'नामकस्योपन्यासस्य संस्कृतानुवादस्य कृते २०१०तमवर्षस्याऽनुवादक्षेत्रीया केन्द्रीयसाहित्याकादमी-प्रशस्तिः प्राप्ताऽस्ति। एतादृशस्याऽऽधुनिकसंस्कृतसाहित्यकारस्य विद्वद्वर्यस्य डा. विश्वासमहोदयस्याऽयं कथासङ्ग्रहः सर्वैरपि संस्कृतभाषाप्रेमिभिः पठनीयः सङ्ग्रहणीयश्च वर्तते। इति॥

# अमरकोशः (गुर्जरभाषीयानुवादेन सह)

-प्रा. मधुसूदनव्यासः

| | | |
|---|---|---|
| **पूर्वसम्पादकोऽनुवादकश्च** | - | **धर्मचंद - केवलचंद - खंडोलः** |
| **सम्पादकः** | - | **प्रा. हर्षवदनः त्रिवेदी** |
| **प्रकाशनवर्षम्** | - | **( पूर्वम् - ऐसवीयं १९१० तमम् ) ऐसवीयं २०१६ तमम् ।** |
| **मूल्यम्** | - | **रू. ४५०/- , पृष्ठानि - ४९२** |
| **प्रकाशनम्** | - | **श्रीपार्श्व-पब्लिकेशन, १०५, नन्दनकोम्प्लेक्ष, मीठाखली नटराज सिनेमा-रेल्वे क्रोसिंग समीपे, अहमदाबाद - ६** |

''अमरकोशो जगत्-पिता '' इति सूक्तिः संस्कृत साहित्यजगति प्रसिद्धाऽस्ति । तादृशस्य जगत्पितृ-तुल्यस्याऽस्य **अमरकोशस्य** गूर्जरानुवाद सहितं प्रकाशनं ऐसवीये १९१०तमे वर्षे जातमासीत् । तस्य (प्रा. हर्षवदन-त्रिवेदी महोदयेन) पुनः सम्पादनं कृत्वा पार्श्व-पब्लिकेशन-संस्था द्वारा ऐसवीये २०१६तमे संवति पुनःप्रकाशनं जातम् । एतदर्थं प्रा. हर्षवदन-त्रिवेदी-महाभागः पार्श्व पब्लिकेशन संस्था च साधुवादमर्हतः ।

अस्य ग्रन्थस्य पूर्वतन-प्रस्तावना पूर्वतन-सम्पादकीयो लेखश्चाऽत्र यथातथं मुद्रितोऽस्ति, यत्राऽमरकोशस्य संस्कृतभाषाभ्यासिनां कृते उपयोगितां, अमरकोशस्योपयोगश्च कथं कर्तव्य - इत्यादि विषयमधिकृत्य सुष्ठु निरूपणं कृतभस्ति । तदनन्तरं 'डिजिटल्-युगे अमरकोशः' इत्याख्येऽद्यतनसम्पादकीये लेखे, आधुनिके जगति संगणकयन्त्रे संस्कृतभाषाव्याकरणस्योपयोगः संगणकयन्त्रस्य महत्त्वमित्यादिविषयानधिकृत्य सदृष्टान्तं ससन्दर्भ च सुष्ठु निरूपणं कृतमस्ति । अतो ये संगणकथन्त्रज्ञास्तेषां कृतेऽयं ग्रन्थोऽतीवपयोगी भवेत्, ये च संगणकथन्त्रानभिज्ञास्तेषां कृतेऽपि पारम्परिकपद्धत्याऽस्य मुद्रणमुपयोगि भवेदेव । ग्रन्थान्ते संस्कृतशब्द-सूचिर्गूर्जरशब्दसूचिश्च मुद्रिते स्तः । ग्रन्थोऽयं गूर्जरभाषाभिज्ञानां संस्कृतभाषाभ्यासकृतेऽतीवोपकारकोऽस्तीत्यत्र नास्ति सन्देहः । एतादृशस्य ग्रन्थरत्नस्य सम्पादनार्थं पुनःप्रकाशनार्थं च सम्पादक-प्रकाशकमहोदययोर्भूयांसो धन्यवादाः ।

**९७, जलदर्शन सोसायटी,**
**मालपुर रोड, मोडासा( गूजरात ) ३८३३५५**

# संस्कृतकवितागौरवम्

(संस्कृतकवितासंग्रहः)

- **डो. रूपनारायणपाण्डेयः**

रचयिता तथा प्रकाशकः - **डो. रामकिशोर मिश्रः**

२९५/१८, पट्टीरामपुरम्, खेकडा (बागपत) उ.प्र. - २५०१०१

विद्यन्ते साम्प्रतं सुरभारतीसमुपासनासक्ता बहवो विद्वांसः, तेषु वार्धक्येऽपि सततं साहित्यं संरचयति डा. रामकिशोरमिश्रः । 'संस्कृतकवितागौरवम्' इति नामकः तस्य नूतनः काव्यसंग्रहः प्रकाशितोऽस्ति ।

ग्रन्थेऽस्मिन् पञ्चदशोत्तरशतकविताः सङ्कलिताः सन्ति । तद्यथा - ईश्वरस्य व्यापकता, भगवद्दर्शनं कृतम्, तपस्या मातृसेवया, त्वं कन्याविवाहान् कुरु, बिडाल्यां कालीदर्शनम्, सेवा सर्वोपरि धर्मः, निद्रोपासना, इत्याद्याः । ग्रन्थान्ते लेखकस्य परिवारस्य च परिचयः शोभते ।

नितरां सरलया भाषया विविधविषयान् समाश्रित्य कविवर-मिश्रस्य भारती भव्यभावोपेतां कवितां प्रस्तौति । तस्य राष्ट्रप्रीतिः प्रशंसनीयाऽस्ति । 'तदहमस्मि भारतम्' इति कवितायां भारतपुरुषस्य तस्य कल्पनावलोकनीयाऽस्ति ।

**'अहमत्र भारतोऽस्मि मस्तको मे हिमालयः ।**
**एतौ स्तौ मदीयौ हस्तौ पूर्वापरपयोनिधी ॥**

**उत्तरदेशो मे वक्षो मध्यदेशो ममोदरम् ।**
**महाराष्ट्रप्रदेशो मे समुद्रवृता मे कटिः ॥**

**आन्ध्रतमिलनाडु च द्वे जङ्घे भवतो मम ।**
**चरणौ मम स्तः कन्याकुमारीह रामेश्वरम् ॥' ( सं., ३१६-३१८ )**

अद्य मानवः कर्तव्यं विनैव पदं प्रतिष्ठां विपुलां च सम्पदं कामयते । सन्दर्भेऽस्मिन् कवेः केचन निर्देशाः पठनीया अनुगमनीयाश्च ।

**'यावत् ते सुखदो लाभः परहानिः सुखप्रदा ।**
**तावत् ते नाऽत्र कल्याणं हानिश्चैव भविष्यसि ॥**

**तव प्रिया परनिन्दा यावत्ते प्रशंसा प्रिया ।**
**तावत् त्वं निन्दनीयोऽसि कल्याणं न भविष्यति ॥**

**यावत् प्रियः स्वसम्मानः परापमानश्च प्रियः ।**
**तावत्त्वमस्मिंल्लोके ह्यपमानितो भविष्यति ॥**

**यावत्ते सुखस्य वाञ्छा कामनाऽन्यदुःखस्य च ।**
**तावत्त्वं सर्वदा दुःखं प्राप्स्यस्यत्र निरन्तरम् ॥**

**यावत्त्वं प्रदाने दुःखं जानासि ग्रहणे सुखम् ।**
**तावत् तुभ्यमत्र लोके कोऽपि वस्तु न दास्यति ॥' ( सं. ३६१-३६४, ३६६ )**

सम्प्रदायनिरपेक्षे कवितासंग्रहेऽस्मिन् समाजोपयोगिषु सर्वेषु विषयेषु कविना स्वविचाराः संप्रस्तुताः । यस्मिन् कर्मणि समाजस्य राष्ट्रस्य सकललोकस्य च कल्याणं स्यात्, तेषां प्रशस्तिरत्र नितरामृजुतया प्रस्तूयते । कुत्राऽपि भावाभिव्यक्तौ नास्ति गूढता, न च शब्दानां प्रयोगे क्लिष्टता दुरूहता वा । ये संस्कृतभाषायाः दुरूहत्वं मन्यन्ते, तेषां कृते कृतिरियं नितरामुपयोगिनी । ते रचनामिमामधीत्य संस्कृतस्य सारल्यमनुभवितुं शक्नुवन्ति । रचनेयं संस्कृतानुरागिभिः संग्रहणीया पठनीया च । जयति संस्कृतं संस्कृतिश्च ।

**मनी का पूरा,**
**चांदपुर, सोरामः,**
**प्रयागः २१२५०२ ( उ.प्र. )**

# मर्म गभीरम्

-मुनिकल्याणकीर्तिविजयः

## ( १ ) जीवनयात्रा

- जीवनयात्रायः कः पन्थाः ?
+ दैनन्दिनं जीवनमेव खलु !
- अस्याऽभ्यासः कथं कर्तव्यः ?
+ यद्यभ्यासस्य प्रयत्नं कुर्यात तर्हि भ्रान्ता भवेत !!

---

## ( २ ) रक्षणम्

राम-लक्ष्मणौ रावणात् सीतां मोचयितुं लङ्कां प्रति प्रस्थितौ । सुग्रीवो हनुमान् समग्रा च वानरसेना तयोः सहयोगार्थं सहैव आसन् । अथ च लङ्कां गन्तुं समुद्रस्तूल्लङ्घयितव्य एव । अतो वानरसेना सेतुं निर्मातुमुद्युक्ता । सहस्रशो वानरा अहर्निशं कार्यं कुर्वन्ति स्म । महतः पाषाणखण्डान् ग्राहं ग्राहं ते सामुद्रे जले रामनामग्रहणपुरस्सरं क्षिपन्ति स्म । ततश्चाऽतिगुरवोऽपि ते पाषाणा जले नैव निमज्जन्ति स्माऽपि तु तरन्तः सन्तः सेतुबन्धं निर्मान्ति स्म ।

रामः सर्वमपि निरीक्षते स्म । तेन चिन्तितं - 'वराका अते वानराः कियन्तं परिश्रमं कुर्वाणाः सन्ति ! अहं त्वेवमेवोपविष्टोऽस्मि निष्क्रियः । अतोऽहमपि तावत् तेषां साहाय्यं करोमि किञ्चित्' ।

सोऽपि महान्तमेकं शिलाखण्डमानीय जले क्षिप्तवान् । क्षिप्तमात्र एव च जले निमग्नः स खण्डः । एतेन रामस्य महदाश्चर्यं सञ्जातं कोपोऽपि च समुद्गतः । स धावित्वा पुनरपि द्वि-त्रान् पाषाणान् समानीतवान् जले क्षिप्तवांश्च । किन्तु तेषामपि सैव गतिरभवत् ।

एतत् सर्वं विलोकयन् हनुमान् उच्चैर्हसितुमारब्धः । एतेन रामो भृशं लज्जितः । तदा हनुमान् कथितवान् - 'प्रभो ! यदा वयं पाषाणान् जले मुञ्चामस्तदा भवतो नाम गृहीत्वा मुञ्चामो येन नामस्वरूपो भवान् तान्

रक्षित्वा जले तारयति । किन्तु भवान् यं मुञ्चति (त्यजति वा) तं को वा रक्षितुं समर्थः स्यात् ? अतः कृपया परिश्रममेनं त्यजतु भवान्' ।

एतच्छ्रुत्वा स्मयन् रामो वानराणां भक्त्या श्रद्धया च प्रसन्नोऽभवत् तेषामुत्साहं चाऽवर्धयत् ।

---

## ( ३ ) स्पशबुद्धिर्विजयते

एकस्य राज्यस्य सैनिकाः कथमपि प्रतिवेशिराज्यस्य स्पशमेकं निगृहीतवन्तः । ततः सम्यक् ताडनं कृत्वा तस्य देहं वस्त्राणि चाऽन्विष्टवन्तः । अन्वेषणेन चैको मिष्टान्नपूर्णो लघुप्रसेवकः प्राप्तस्तैः । मिष्टान्नं दृष्ट्वा सैनिकानां मुखानि लालायितानि सञ्जातानि । सर्वेऽपि मिष्टखादनार्थमुत्सुका अभवन् । किन्तु, एकः सैनिक उक्तवान् – 'तिष्ठन्तु भोः ! मिष्टान्नमेतत् खलु विषयुक्तं तु न स्यात् ?'

तदाऽन्यः कथयति स्म – 'का चिन्ता ? प्रथमं तावत् खण्डमेकं खादयतु स्पशस्याऽस्यैव । यदि विषमयं स्यात् तदाऽयमेव मरिष्यति । यदि च विषरहितं स्यात् तदाऽस्य न किञ्चिद् भविता । ततश्च वयमपि खादिष्यामः कणेहत्य' ।

ततश्च मिष्टखण्ड एकः स्पशस्य मुखे प्रक्षिप्तस्तैः । काञ्चिद् वेलां च प्रतीक्षां कृत्वा तं च स्वस्थं दृष्ट्वा शिष्टं मिष्टान्नं विभज्य स-रसास्वादं भुक्तं तैः । इदानीं स्पशो राज्ञः समक्षमुपस्थापयितव्य आसीत् । द्वि-त्रदिनैरेव तस्य मरणदण्डोऽपि निश्चित आसीत् ।

तावता, स स्पशो वमनं कृतवान् सघूर्णनं चाऽधः पतितवान् । श्वसनं कर्तुमपि स कष्टमनुभवति स्म । एतद् दृष्ट्वा सैनिका व्याकुलीभूताः । 'किं सञ्जातं रे ? अस्माकं तु न किमपि भवति !' – एकः सैनिक उच्चैः पृष्टवान् ।

'किञ्चिदिव प्रतीक्षन्ताम् ।.. ममाऽपीदानीमेव प्रारब्धमस्ति । मन्ये... यदवश्यं मरिष्याम्यहम्...' स कृच्छ्रेणोक्तवान् मरणदम्भं च कर्तुमारब्धः ।

सर्वेऽपि सैनिकास्तं तत्रैव विमुच्य चिकित्सकमन्वेष्टुं नगरं प्रति धाविताः । स्पशोऽपि सावधानमुत्थाय स्वदेशं प्रति पलायितः ।

---

## ( ४ ) गान्धि-पादत्रे

महात्मा गान्धिरेकदा रेल्याने प्रवसन्नासीत् । यानारोहणसमये एव तस्यैकं पादत्रं कथमपि स्खलितं सत् पट्टकमध्ये पतितम् । तस्य प्रतिग्रहणं शक्यं नाऽऽसीत् । रेल्यानमपि सवेगं चलितुमुद्युक्तमासीत् । अतो गान्धिवर्येण शान्त्या द्वितीयमपि पादत्रं निष्कास्य पट्टकमध्ये प्रक्षिप्तम् ।

'महोदय ! महोदय ! भवान् किं कुर्वन्नस्त्येतत् ?' – सर्वेऽपि सहयात्रिणः पृष्टवन्तः ।

गान्धिवर्यः सस्मितमुक्तवान् – 'येनैकं पादत्रं प्राप्स्यते तेनैवैतद् द्वितीयमपि प्राप्येत यदि, तदा स तद् द्वयमपि सम्यगुपयोक्तुं शक्ष्यति खलु !!'

---

## ( ५ ) किं कर्तव्यम् ?

एकस्मिन् प्राणिसङ्ग्रहालये एकः सिंह नूतनतयाऽऽनीत आसीत् । तत्रत्यं दृश्यं दृष्ट्वा स भृशमाश्चर्यचकितोऽभवत् । बहवः सिंहास्तत्राऽऽसन् । नैके तु बहुभ्यो वर्षेभ्यः पूर्वमेवाऽत्राऽऽनीता आसन्, नैके चाऽत्रैव जनिं प्राप्ता आसन् ।

अनेन सिंहेनाऽत्रत्यं वातावरणं निरीक्षितुमारब्धम् । तेन विलोकितं यत् - सिंहानां बहवो गणाः सञ्जाताः सन्ति। एको गणः समजसेविनां सिंहानामासीत् । अन्यस्तु कलाकाराणाम्, अपरो रूढिवादिनां, कश्चन देशभक्तानां गणः, एकतमस्तु चर्चा-विचारकारिणाम्, अपरस्तु स्वातन्त्र्यप्राप्त्यनन्तरं वयं कथं भविष्याम इति स्वप्नद्रष्टृणामप्यासीत् । केचन सिंहास्तु विप्लवकारिणोऽप्यासन् । ते वारं वारमन्यान् सिंहानुपद्रवन्ति स्माऽधिकारिवर्गस्य च विद्रोहं कुर्वन्ति स्म । एतेन बहुशः सिंहानां मध्ये भीषणं युद्धं प्रवर्तते स्म, बहवश्च सिंहा म्रियन्ते स्माऽपि । कदाचित् तु समग्रो गण एव नष्टो भवति स्म । ततश्च नूतना रक्षका नियुज्यन्ते स्म। किन्तु सिंहानां मुक्तिर्नैव भवति स्म ।

अयं हि सिंहः शनैः शनैः सर्वमपि समवगच्छेद् यावत् तावत् तस्य दृष्टिपथे एको धीरः सिंहः समागतः। स कस्याऽपि गणस्य सदस्यो नाऽऽसीत् । इदानीं च स प्राणिसङ्ग्रहालयस्य परितः कल्पितां वृतिं निरीक्षमाण उपविष्ट आसीत् । सर्वेऽपि तं सादरं ससम्मानं च सम्भावयन्त आसन् । नूतनं सिंहं दृष्ट्वा स तं परामर्शं ददानोऽवदत् – 'भोः ! भवान् कस्याऽपि गणस्य सदस्यो मा भूत् । ममेमं परामर्शं सर्वथा मा अवजीगणत्। एते सिंहा हि यत्कर्तव्यं विस्मृत्य क्षुद्रेषु विषयेषु मुधा स्वकालं व्ययीकुर्वन्ति'

'तर्हि तैः किं वा कर्तव्यम् ? – नूतनः सिंहोऽपृच्छत् ।

'तैः खल्वेतस्या वृतेः समीक्षणं कर्तव्यं भोः !' – स सस्मितमवदत् ।

# मानवप्रेम

- मुनिधर्मकीर्तिविजयः

एको भक्तः स्वशयनखण्डे सुप्त आसीत् । तेनैकः स्वप्नो दृष्टः - स्वगृहस्याऽपवरके प्रकाशः प्रसृतः । सुगन्धीनि सुन्दराणि च पुष्पानि उद्गतानि । तत्रोपस्थित एको देवदूतः पुस्तके किमपि लिखितवानस्ति ।

भक्तः पृष्टवान् - भवान् किं लिखितवानस्ति ?

देवदूत उवाच - ये ये जीवा भगवति प्रेम कुर्वन्ति, तेषां सर्वेषां जनानां नामानि लिखामि किल ।

भक्तेन पृष्टं - किं मम नामाऽस्त्यत्र ?

देवदूत उक्तवान् - नास्ति ।

एतच्छुत्वाऽतिनम्रभावेन प्रशान्तमनसा भक्तेन कथितम् - महोदय ! ये ये जना मानवेषु प्रेम कुर्वन्ति, तेषां मानवानां श्रेण्यां मम नाम लिखतु भवान्, इति ।

एवं लिखित्वा क्षणं देवदूतोऽदृश्यतां प्राप्तवान् ।

द्वितीयदिने रजन्यां पुनर्दिव्यप्रकाशो देवदूतश्च तेन दृष्टः ।

तदैव देवदूतोऽवदत् - भगवता येभ्यो जीवेभ्य आशीर्दत्ता, तादृशानां मानवीनां श्रेण्यां प्रथममस्ति ते नाम ।

'सर्वजीवेषु प्रेम देयम्' - इति येन शिक्षितम्, स धर्म उच्यते ।

# मानवभवस्य मूल्यम्

- मुनिधर्मकीर्तिविजयः

आसीदेको धनिकः श्रेष्ठी । सद्भाग्येन सहाऽस्य मैत्री सुष्ठु विद्यते । सद्भाग्येन स सर्वत्र सफलतामेव प्राप्नोति स्म । आनन्देन स कालं गमयति स्म ।

एकदा दैवं कुपितम् । ततस्य श्रेष्ठिनो वाणिज्ये पुष्कलं धनं विनष्टम् । तस्य मन उद्विग्नं जातम् । मनसि बहवो विकल्पा सञ्जाताः । रक्षणस्य न कोऽप्युपायः प्राप्तस्तेन । अन्ते, मरणमेव शरणमिति निर्णीतं तेन । भाग्यबली तदैवैकः सद्गुरुः गृहे भिक्षार्थमागतवान् । भोजनं दत्त्वा तेन श्रेष्ठिना गुरुभगवते निवेदितम् - प्रभो! मम समीपे विपुलं धनमासीत्, किन्त्वद्य सर्वमपि नष्टं जातम् । अहं कि करवाणि ? भवान् कमप्युपायं दर्शयतु, येन जीवनं स्थिरीभवेत् ।

गुरुदेव उवाच - भो !! त्वं यन्नष्टं तदेव पश्यसि, किन्तु तव समीपे यदस्ति तदपि पश्य ।

श्रेष्ठी कथितवान् - प्रभो ! मम समीपे न किमप्यस्ति, सर्वमपि नष्टं जातम् ।

गुरुभगवता श्रेष्ठिनो बोधार्थं दृष्टान्तः कथितः -

रणजितसिंहराजः प्रासादस्य गवाक्षे आसीनः । तदा प्रासादस्य बहिरेको याचको याचनार्थमागतवान् । राज्ञा स दृष्टः । तत्क्षणं राजा तत्समीपमागतवान् पृष्टवाँश्च - किं त्वमिच्छसि ?

याचकेन धनं याचितम् ।

राज्ञोक्तं - मम समीपे यदस्ति तदर्धं तुभ्यं दद्यां, तव समीपे यदस्ति तदर्धं मह्यं दद्याः ।

भिक्षुकेण राज्ञो वचनं स्वीकृतम् ।

राजोवाच - वद ! किं दद्याम् ?

याचको गदितवान् - राजन् ! मह्यमर्धं राज्यं ददातु भवान् ।

राजाऽकथयत् - सत्यं, ते वचनं स्वीकरोमि । अधुनाऽहं याचे - तव समीपे द्वे नयने स्तः । ताभ्यां नेत्रमेकं मह्यं देहि त्वम् ।

भिक्षुको राज्ञो वचनं निशम्यैव किमप्यनुक्त्वाऽन्यत्र गतवान्।

गुरुदेव एतत्कथानकं श्रावयित्वोक्तवान् - श्रेष्ठिन्! ज्ञातं किल? राज्यार्धादपि नयनस्यैकस्य मूल्यमधिकमस्ति। अस्माकं समीपे तु दृष्टियुगलं, द्वौ पादौ, हस्तद्वयम्, एवमखण्डं सुन्दरं निरामयं च देहमस्ति। वद, अधिकं मूल्यं कस्याऽस्ति?

# संस्कारप्रपा

- मुनि अक्षयरत्नविजयः

## ( १ ) जीवनवैशिष्ट्यम्

केभ्यश्चिद्देशेभ्यश्चत्वारः पथिकाः काशीनगरमागताः ।

महापुरुषः सन्न्यासी कबीरोऽत्र निवसतीति तैः श्रुतम् । अतः कबीरस्य दर्शनार्थं ते ग्रामं प्राविशन्।

ग्रामप्रवेशकाल एव तैर्बहिर्ग्रामाद् गच्छन् कश्चिद् मुण्डितशीर्षो जनो दृष्टः ।

पथिका उद्विग्ना अभवन् - अनेन मुण्डितजनेनाऽपशकुनं कृतमिति विचारात् । एकः पथिकस्तस्य मस्तकेऽङ्गुलिकाप्रहारमपि कृतवानपशकुननिवारणार्थम् ।

परमन्येऽवदन् - 'भोः ! एवमपशकुनं नष्टं न भवेत् । तत्कृते तु तस्य शीर्षोपरि पादत्राणेन प्रहारः कर्तव्यः।'

इदं श्रुत्वा स पथिकः स्वस्य पादत्राणं निष्कास्य तस्य शीर्षोपरि प्रहारं कृतवान् । पश्चादानुपूर्व्या सर्वे पथिकास्तस्य मुण्डितजनस्य शीर्षोपरि पादत्राणप्रहारं कृतवन्तः । अत्रान्तरे स मुण्डितजनः स्थिरतापूर्वं तत्र स्थितवान् । स मनागपि न क्रुद्धवान् ।

पथिका अग्रे गताः । क्रमेण भिक्षोः कबीरस्य निवासस्थानं ते प्राप्तवन्तः । तदानीं कबीरवर्यः शौचक्रियार्थं बहिर्गत आसीत् । अतः पथिकाः कबीरस्य प्रतीक्षार्थं गृहाद् बहिरुपविष्टवन्तः ।

अर्धघटिकां यावत् समयो गतः पश्चात् कबीरवर्य आगतः । परन्तु, तं दृष्ट्वा पान्थाः स्तब्धलोचना जडा अभवन् । यतो यस्य जनस्य मुण्डितमस्तके प्रातस्तैः पादत्राणप्रहारः कृताः, स एवाऽयं कबीरः । ते सर्वे नतशीर्षाः स्थिताः । पश्चात् सर्वे पान्थाः कबीरस्य चरणकमलयोः पतितवन्तः । स्वानुचितव्यवहाराय क्षमां याचितवन्तः ।

परं कबीरो महापुरुष आसीत् । स हृदयत उक्तवान् - ''महाशयाः । न किञ्चिल्लज्जाकारणम् । यतः प्रातर्भवद्भिरपशकुननिवारणार्थं मम शीर्षे पादत्राणप्रहाराः कृताः । किन्तु, अधुना भवन्तो ममाऽभ्यागताः सन्ति । अतो भोजनानन्तरमेवेतो गन्तव्यम् ।''

पथिकैर्लज्जया सह कबीरस्य वचनमङ्गीकृतम् । अद्य यावत् कबीरस्य जीवनवैशिष्ट्यं तेषां श्रवणविषयमेवाऽऽसीत्, परमद्य तद् वैशिष्ट्यमनुभवविषयमपि जातम् ।

भिक्षोः कबीरस्याऽयं जीवनप्रसङ्गो यदा ज्ञातस्तदाऽऽप्तवाणीस्मरणमभूत् – 'महापुरुषाणां हृदयं विश्वसदृशं विशालं मेघसदृशं चोदारं भवतीति । जीवनेऽस्माभिः सह शुभोऽशुभो वा कीदृशोऽपि व्यवहारो भवेत्तदा स्थिरमविचलं शान्तं स्थेयमिति सद्बोधोऽपि अनेन प्रसङ्गेन प्राप्यते । अस्माकं शुभव्यवहारो नैकेषां हृदयपरिवर्तनं कर्तुं क्षम इति न विस्मर्तव्यम् ।

## ( २ ) संस्कारपयःशाला

ग्रीसदेशीयस्तत्त्वचिन्तकः सोक्रेटिसः ।

तस्याऽयं प्रेरको जीवनप्रसङ्गः ।

ग्रीसदेशीयमेकं विशालं नगरम् ।

एकदा तस्मिन्नगरेऽद्यतनीय'मोल'सदृश्या विशालपण्यशालाया उद्घाटनमायोजितम् ।

उद्घाटनकर्तृरूपेणाऽऽयोजकैः सोक्रेटिसायाऽऽमन्त्रणं दत्तम । सोक्रेटिस आमन्त्रणं स्वीकृतवान् ।

यथादिनं यथासमयं मित्रसमूहैस्सह सोक्रेटिस उद्घाटनस्थलं गतः । पण्यशाला भव्याऽऽसीत्, तस्याश्चोद्घाटनोत्सवोऽपि भव्यो जातः । उद्घाटनोत्सवस्य पश्चात् सोक्रेटिसः समित्रसमूहो विशाल-पण्यशालां निरीक्षितुमन्तर्गतः ।

पण्यशालायामत्युत्तमानि नैकनि द्रव्याणि विद्यन्ते स्म ।

एकैकं पदार्थं पश्यन् सोक्रेसिो मित्रैः सहाऽग्रेऽचलत् ।

पण्यशालायां कस्मिंश्चित्स्थाने सोक्रेटिसो निर्निमेषनेत्राभ्यामेकं द्रव्यं पश्यति स्म । तदा मित्रेणैकेन सोक्रेटिसः पृष्टः – "मित्र ! कीदृशं दृश्यत इदं द्रव्यम् ।"

सोक्रेटिस उक्तवान् – "शोभनम् ।"

"अयं च पदार्थः ?" सहचरः पुनः पृष्टवान् ।

"अत्युत्तमः " उत्तरं प्राप्तम् ।

पश्चात् पञ्चषा घटिका यावत्ते सर्वे पण्यशालायां पर्यटनमकुर्वन् । सर्वत्रोक्त एवोपक्रमोऽविरामेणाऽचलत् । मित्राणि 'कीदृशः पदार्थोऽयम् ? कीदृशं द्रव्यमिदम् ?' इत्यपृच्छन् । सोक्रेटिसश्च तस्य 'शोभनं, सुन्दरतमं, अत्युत्तममिति' उत्तराणि अयच्छत् ।

अन्ततः पर्यटनं पण्यशालानिरीक्षणं च समाप्तं जातम् । मित्रैः सोक्रेटिसः पृष्टः – "मित्र ! पण्यशालाया एकमद्भुतं द्रव्यमुपहाररूपेण तुभ्यं समर्पयितुमिच्छामो वयम् । वद, कीदृशं द्रव्यं क्रेतव्यम् ?"

"एकमपि न" सोक्रेटिसस्त्वरितमुक्तवान् ।

सविस्मया: सहचरा: पृष्टवन्त: - "भो: सुहृत् ! कथमेवं वदसि ? अधुना तु केभ्यश्चित् क्षणेभ्य: प्राक् त्वयैव पण्यशालाया नैकानि द्रव्याणि शोभनानि सुन्दरतमानि अत्युत्तमानि कथितानि, तर्ह्यधुना कथमेवं वदसि यदेकमपि द्रव्यं न क्रेतव्यमिति ? तव कथने विरोधाभासो नाऽनुभूयते किल ?"

"शृणुत ।" सोक्रेटिस: सगाम्भीर्यमुक्तवान् - "अहं सिद्धान्तस्नेह्यस्मि । यच्च द्रव्यमुत्तमं प्रतिभासेत तद्द्रव्यमुत्तमं नूनं कथयितव्यम् । परं, कीदृशमप्यद्भुतं द्रव्यं भवेत्, विनाऽऽवश्यकतां तत्र क्रेतव्यम् । नैतावद्, उपहाररूपेणाऽपि तस्याऽनङ्गीकार एवोचित इति मम सिद्धान्त: । अतो मम कथने ईषदपि विरोधाभासो न वर्तते । अपि तु मया यत्कथितं तत्सर्वं यथासिद्धान्तमेव कथितम् ।"

सोक्रेटिसस्योत्तमविचारस्य स्पर्शात् तत्रस्थैस्तै: सहचरै: सोक्रेटिस: संस्कारपय:शालासदृशोऽनुभूत: । यतो पय:शालासमीपाद् यथा शीतजलं प्राप्यते तथा सोक्रेटिससमीपाज्जाने तै: संस्कारजलमेव प्राप्तमिति ।

सोक्रेटिसस्याऽयं जीवनप्रसङ्गोऽस्मान् बोधयति - आसक्तिवशाद् सङ्ग्रहशीलो न भवेत्, किन्तु आवश्यकतामाश्रित्य तदर्थ एव सङ्ग्रह: कर्तव्य: ।

## ( ३ ) हृदयस्थ आरक्षक:

अमेरिकादेशीया घटना । तत्रस्थं 'डन्कर्क' इत्याख्यं नगरम् ।

एकदा तत्रस्थो 'रेमन्ड' इत्याख्य: ख्यातिप्राप्त: कश्चिन्न्यायाधीश: स्वयानचालकमुक्तवान् - "भो: ! अहं शीघ्रं न्यायालयं गन्तुमिच्छामि । तत्र महत्त्वपूर्णकार्यं मां प्रतीक्षते ।"

न्यायाधीश: कारयाने उपविष्टवान् । कारयानं च नगरस्य राजमार्ग आशुगत्या धावितुमारब्धवत् । अग्रे चतुष्पथेऽवरोधसूचको यातायातसङ्केत: प्रकाशते स्म । किन्तु, यानचालक: सङ्केतमुपेक्ष्य कारयानमचालयत् ।

न्यायाधीशेन ज्ञातं यद् यातायातनियमभङ्गोऽभूत् । एतस्याऽपराधस्य दण्ड: पञ्चडोलरमितो भवेत् । सोऽचिरादारक्षकस्थानं गतवान् । दण्डशुल्कं च यच्छन् कथितवान् - "मित्र ! मम यानचालकेन यातायातनियम: खण्डित: । अत इदं दण्डशुल्कं ग्रहीतव्यं, तस्य च स्वीकारपत्रं देयम् ।"

सन्मुखे महान् न्यायाधीश आसीत् । अत आरक्षकाधिकारी अपि दण्डं ग्रहीतुं सङ्कोचमनुभूतवान् । स उक्तवान् - "मान्या: । यातायातारक्षकेण भवतो दण्डो न कृत:, तथाऽपि कथं दण्डशुल्कं देयम् ?"

न्यायाधीश उक्तवनान् - "भो: ! कामं यातायातारक्षको मां न दण्डितवान्, किन्तु ममाऽन्त:करणेऽपि एक आरक्षको विद्यते । तेन त्वहं दण्डित एव । अतो दण्डशुल्कमावश्यकमेव ।" इदं श्रुत्वाऽऽरक्षक: क्षणं यावन्नेत्रे निमील्येममादर्शं पुरुषं वन्दितवान् ।

एवं नाऽनुभूयते यदस्माकमन्त:करणेऽपि एतादृश एक आरक्षक आवश्यक: ? योऽस्मान् पापेभ्यो दोषेभ्यश्च रक्षेत्, अस्मज्जीवनं च निर्दोषं रचयेत् ?

## ( ४ ) सकलशास्त्रपारगामी

काशीनगरस्य कश्चिद् राजा ।

तेन विशाला विद्वत्सभाऽऽयोजिता । तत्कृते देश-विदेशानां पण्डितवर्याणामामन्त्रण-पत्राणि प्रेषितानि। विद्वद्गोष्ठ्यर्थं विशिष्टायोजनानि कृतानि ।

विद्वद्गोष्ठीदिनमागतम् । देश-विदेशेभ्यो नैकशताः पण्डिता आगताः । अस्यां सभायां निकटस्थस्य कस्यचिद् ग्रामस्य मूर्खः क्षौरिकोऽपि गन्तुकामो जातः । सोऽपि गोष्ठीदिनात् प्राक् स्वीये कलशास्त्रे पुटके गृहीत्वा काशीनगरं गतवान् । पण्डितानां च स्तोकपरिचयात् कानिचित् संस्कृतवाक्यानि अपि वक्तुं सक्षमोऽभूत् ।

अन्ततो गोष्ठी आरब्धा । किन्तु गोष्ठीप्रारम्भ एव सभाध्यक्षपदे कः पण्डितो विराजमानो भवेदिति प्रश्नः समुपस्थितो जातः । सभामध्ये केचिद् विद्वद्वर्या न्यायविषयेषु, केचित् साहित्यविषयेषु, केचिद् व्याकरणविषयेषु, केचित् काव्यविषयेषु निष्णाता आसन् । विद्वानिव सभामध्य उपविष्टो नापितोऽपि राज्ञा पृष्टः - "पण्डितवर्य ! त्वं कीदृशो ज्ञानवानसि ?"

"अहं सकलशास्त्रपारगामी अस्मि ।" क्षौरिकः सगर्व उक्तवान् ।

राजा श्रुत्वेदमतिहृष्टः । स सहसा उक्तवान् - "अतिशोभनम्, अत्र सर्वविषयाणां ज्ञाता त्वमेवाऽसि । अतस्त्वं सभाध्यक्षपदे नियुक्तो भवसि ।"

क्षौरिकस्त्वतिसुखमनुभूतवान् । स सभापतिपदं प्राप्य मुख्यासन उपविष्टवान् । अथ सभाकार्यमारब्धम्।

विविधविषयेषु नैकदिनानि यावदतिक्लिष्टचिन्तनानि अभवन् । अत्रान्तरे सर्वथा अज्ञानशिरोमणिः स क्षौरिको मौनेनैव तत्र स्थितवान् । अतः सर्वे विद्वांसस्तस्य मूर्खत्वं न ज्ञातवन्तः । यत उक्तमपि 'बलं मूर्खस्य मौनित्वम्' इति । मूर्खस्य वैभवो मौनमेवाऽस्ति ।

चिन्तननिष्कर्षदिने निर्णयं दातुं राज्ञा सभाध्यक्षरूपेण स्थितः स मूर्खः क्षौरिक उक्तः, तदा किङ्कर्तव्यमूढः स उक्तवान् - 'अहं त्वेतत्सर्वं किञ्चिदपि न जानामि । नाऽहं कोविदः, अहं तु निकटस्थग्रामस्य क्षौरिकः । पण्डितसभां द्रष्टुमेवाऽहमत्राऽऽगतः ।

इदमाकर्ण्य सर्वे पण्डितप्रवरा जडा एवाऽभूवन् - 'वयं कस्यचिन्मूर्खस्य सन्मुखं गहनचर्चां कृतवन्त' इति चिन्तनात् ।

राजाऽपि क्रुद्धः सञ्जातः । स पृष्टवान् - "भोः ! यदि त्वं सर्वथाऽज्ञोऽसि, तर्हि 'अहं सकलशास्त्रपारगामी अस्मि' इति कथनस्य कोऽर्थः ?"

क्षौरिक उक्तवान् - "महाराज ! क्षमस्व माम् । परं, मया तु मनागपि अभ्यासो न कृतः । तथाऽपि अहं सकलशास्त्रपारगामी निःशङ्कमस्मि ।" इत्युक्त्वा क्षौरिकः स्वस्य पुटकात् कलशास्त्रे निष्क्राम्य दर्शितवान्

कथितवांश्च – "महाराज ! क्षौरकार्येऽहमनयोः कलशास्त्रयोः पारगामी अस्मीति मम कथनस्याऽर्थः ।"

'सकलशास्त्रपारगामी अस्मि' इतिवाक्यस्येमं विलक्षणमर्थं श्रुत्वा सर्वे पण्डितवर्या अतिहास्यपूर्णा अभवन् । स च क्षौरिको राज्ञा सभाध्यक्षपदच्युतः कृतः ।

अस्माकं प्रबोधिकेयं कथा । स क्षौरिकस्तु अज्ञ आसीत्, अतस्तेनैवं तम् । परं, प्राज्ञा अपि वयं कदाचित् 'अहं सर्वविषयाणां ज्ञाता इति, अहं सर्वेभ्य उत्तम इति, अहं च सर्वेभ्यो मतिमानिति' अभिमानयुता भवामः । परं नूनं स्मर्तव्यम् – अहं श्रेष्ठ उत्तम इति प्रमाणार्थं जीवनं न पूर्णीकर्तव्यम् । परन्तु तेषां गुणादीनां प्राप्त्यर्थं योग्यैर्भवितव्यम् । यदि योग्यतां प्राप्स्यामस्तर्हि सिद्धिरस्माकं सहचरी भविष्यति नूनम् ।

# नाम्नि किमस्ति ?

- सा. श्री सौम्यप्रभाश्रीः

यथा नाम तथा गुणाः - यादृशं नाम भवति तादृशा गुणा अपि भवन्ति - इति तु बहुधा दृश्यतेऽपि। किन्तु सर्वदाऽप्येवमेव भवतीति तु न सत्यम्।

एकं नगरमासीत्। तत्र बहवः श्रेष्ठिनोऽवसन्। एकस्य श्रेष्ठिनो रूपवती गुणवती च कन्याऽऽसीत्। श्रेष्ठिना तस्याः कृते एकः सुरूपो गुणवान् कलावांश्च श्रेष्ठिपुत्रो विलोक्य तेन सह तस्या विवाहः कारितः। स श्रेष्ठिपुत्रो यद्यपि तस्याः कन्यायाः मनसि सर्वथोचितः प्रतिभातः, सा तस्मिन् बहु स्निह्यति स्माऽपि, तथाऽपि तस्य नाम ठन्ठनपाल इत्यासीत्, यच्च तस्यै न रोचते स्म। यदा-कदाचिदपि सा तदेव चिन्तयति स्म यद् न शोभनमिदं नामेति।

एकदा सा जलमानेतुं नगराद् बहिर्गता। तावता तयैका स्त्री गोमयं चिन्वती दृष्टा। तत्पार्श्वं प्राप्ता सा तामपृच्छत् – 'भोः ! किं ते नाम ?' तयोक्तं – 'मम नाम लक्ष्मीः'। एतन्निशम्यैषा विस्मिता चिन्तितवती च – 'अहो ! नाम्ना लक्ष्मीरप्येषा गोमयं चिन्वती दृश्यते, महदाश्चर्यकरं खल्वेतत् !'।

ततो जलं गृहीत्वा गृहं प्रतिनिवर्तमाना सा कञ्चन दरिद्रं भिक्षां याचमानं दृष्टवती। सोऽपि तया पृष्टः – 'किं तेऽभिधानम् ?' तेनोक्तं – 'मम नाम धनपालः' इति। श्रुत्वैतत् 'किं धनपालोऽपि सन्नेष भिक्षां याचते खलु ?' इति चिन्तयन्ती साऽग्रेऽगच्छत्।

मध्येमार्गं तया कस्यचिज्जनस्य स्मशानयात्रा दृष्टा। 'कोऽयं मृतः ?' इति तया पृष्टे कश्चनोदतरत् - 'अमरचन्द्रनामाऽयं श्रेष्ठी प्रातरेवाऽद्य मृतः' इति। 'अरे ! अमरचन्द्रोऽपि नाम यद्रि म्रियेत तदा किं नु कर्तव्यम्?' इति चिन्तयन्ती सा बोधं प्राप्तवती यद् 'नामनि न किमप्यस्ति, गुणास्तु मनुष्यस्य पुरुषार्थमेवाऽवलम्बन्ते, अतो नाम्नो मोहो न कर्तव्यः'।

"लक्ष्मीर्गोमयमुञ्छन्ती, भिक्षते धनपालकः।<br>
मृतश्चाऽमरचन्द्रो हि, श्रेष्ठष्ठन्ठनपालकः ॥"

# सरलता

- सा. तत्त्वनन्दिताश्रीः

चन्दनपुरनगरे चन्दनदासो नाम एकः सज्जनः कुटुम्बेन सह प्रतिवसति स्म । तस्य मङ्गलदास-जिनदासौ नाम द्वौ पुत्रावास्ताम् । मङ्गलदासः स्वार्थशील आसीत् । स सेवावसरे कदाऽपि न तिष्ठति स्म, भोजनेऽग्रेसर आसीत्, कार्ये च तन्द्रालुः । स स्वस्य भ्रातरं जिनदासमपि वञ्चयति स्म ।

जिनदासः सेवावसरेऽप्रमत्तः, कार्ये च कुशल आसीत् । न कस्मिन्नपि कार्ये फलमपेक्षते स्म । कदाऽपि, कस्याऽपि च सेवायां स तत्परस्तिष्ठति स्म, सर्वेषां जनानां च हितमिच्छति स्म ।

द्वयोः भार्ययोरपि तयोरिव गुणा आसन् । मङ्गलदासस्य पत्नी मायाविन्यासीत्, जिनदासस्य च भार्या सरला आसीत् ।

एकदा चन्दनदासो व्याधिग्रस्तो जातस्तदा द्वौ पुत्रौ तस्य सेवायामुपस्थितौ जातौ । जिनदासस्सेवायां तत्पर आसीत् । किन्तु मङ्गलदासस्य हृदये सद्भावो नाऽऽसीत् ।

चन्दनदासो द्वयोः स्वभावं जानाति स्म । तथाऽपि स द्वौ पुत्रौ आहूय कथितवान् यत्, अथ मम जीवितं न चिरम् । ततो युवाभ्यां मृत्योः पश्चात् सम्यक्रीत्या प्रेम्णा च स्थातव्यम् । अहं युवयोरेकं रहस्यं कथयितुमिच्छामि । तत् शृणुतम् ।

अस्माकं भाण्डागारे द्वे मञ्जूषे स्तः । एकस्यां मञ्जूषायां सुवर्णस्य मुद्रिकास्सन्ति, द्वितीये च ताम्रस्य मुद्रिकास्सन्ति । युवां परस्परं मिलित्वा गृह्णीतम्, इति कथयित्वा तयोः पिता मृत्युं प्राप्नोत् ।

पितुरन्तिमक्रियां कृत्वा कपटकुशलो मङ्गलदासो जिनदासं कथितवान् – हे भ्रातः ! अहं पित्रा सह बहुकालपर्यन्तं वाणिज्यमकवम्, ततः सुवर्णस्य मुद्रिका यस्यां मञ्जूषायां सन्ति, तां मञ्जूषामहं नेष्यामि, त्वं च ताम्रस्य मञ्जूषां गृहाण ।

सरलो जिनदासो भ्रातुर्वचनं स्वीकृत्य ताम्रमुद्रिकाभृतां मञ्जूषां गृहीत्वा स्वीयं गृहमगच्छत् । गृहं च गत्वा जिनदासेन जिनेश्वरस्य नामस्मरणं कृत्वा मञ्जूषा उद्घाटिता ।

तत्पश्चात् ताम्रस्य मुद्रिका गणयितुं यदा जिनदासो मञ्जूषां रिक्तां कृतवान्, तदा तस्यामेकं पत्रमपि बहिर्निर्गतम् । तस्मिन् पत्रे लिखितं यत् द्रावके यदि ताम्रमुद्रिकाः क्षालयेयुः, तर्हि ताः सुवर्णमुद्रिका भवेयुः । तत्पत्रं पठित्वा जिनदासेन एवं प्रक्रिया कृता । तदा शीघ्रमेव मुद्रिकाणां ताम्रवर्णः परावृत्य सुवर्णवर्णो जातः । सर्वा मुद्रिकाः सुवर्णमय्योऽभवन् । **सारः** - "सरलस्य न कदाऽपि हानिर्भवति" ।

कथा

# परमस्य प्रेम

- सा. श्रीसंवेगरसाश्रीः

कृष्णमहाराजस्य महिषी रुक्मिण्येकदा स्वप्ने राधामपश्यत् । तां दृष्ट्वा साऽपृच्छत् - 'राधे ! भगिनि ! अत्र द्वारिकायां सर्वविधमपि सुख-सौविध्यमस्ति । अहमन्याश्च सर्वा अपि महिष्यः कृष्णमहाराजं प्रीणयितुं कमपि सदुपायं न मुञ्चामः । तथाऽपि यदा-कदाचिदपि महाराजस्य कर्णयोर्भवत्या नाम पतति तदा तत्क्षणमेव स उदासो भवति । अतोऽहं भवत्यै एतावदेव पृच्छामि यत् - तव प्रेम्णि समर्पणे च तादृशं विशिष्टं किं वाऽस्ति यन्नः समीपे नास्ति ?'

रुक्मिण्या वचः श्रुत्वा राधाऽप्यस्वस्था जाता । क्षणोनैव स्वस्थीभूय साऽवदत् - 'अस्य प्रश्नस्योत्तरं भवती श्रीकृष्णस्यैव पृच्छतु' । एतावति श्रुतमात्रे एव रुक्मिण्या निद्राभङ्गो जातः । प्रभाते सा कृष्णमहाराजं कथितवती - 'स्वामिन् ! अद्य रात्रौ मया स्वप्ने राधा दृष्टा.....' । राधाया नाम्नि श्रुतमात्रे कृष्णस्याऽक्ष्णोरश्रुधारा निर्गता । एतच्च दृष्ट्वा रुक्मिणी क्षुब्धाऽभवत् तथाऽपि धैर्यमवलम्ब्य सा कृष्णायाऽश्रुनिर्गमनस्य कारणं पृष्टवती । कृष्णेनोक्तं - 'राधैवैतत्कारणज्ञानार्थं त्वया प्रष्टव्या' इति ।

ततश्चोत्तरं प्रतीक्षमाणाया रुक्मिण्याः स्वप्ने पुनरप्येकदा राधा समागता । तदात्वे च सा किञ्चित् स्वस्था प्रतिभाताऽतो रुक्मिणी तस्यै कृष्णस्याऽश्रुनिर्गमनस्य कारणं पृष्टवती । तदा राधयोक्तं - 'भगिनि ! यदा भवती कृष्णस्य मयि स्नेहस्य कारणं मे पृष्टवती तदा मम कृष्णस्य स्मरणं जातं, ततश्च तस्य स्मरणेन तद्विरहवेदनया चाऽहं भृशमरोदम् । यदा च भवती तदर्थं कृष्णाय पृष्टवती तदा सोऽपि मम स्मरणेन गद्गदो जातोऽश्रूण्यस्रावयच्च । अस्योभयस्य कारणमिदमेव यदावयोर्द्वयोरपि निर्दोषं प्रेमाऽस्ति । वयं वृन्दावनस्याऽकिञ्चना गोप्यः स्मः । अस्माकं तु कृष्ण एव सर्वस्वम् । तस्य स्मरणेन च रोदनमेवाऽस्माकं स्वभावः । अथ चैतावदेव भवत्यै प्रार्थयेऽहं यद् भवत्या तादृशं किमपि न कर्तव्यं कृपया, येन श्रीकृष्णोऽस्मान् स्मरेत् । तथा श्रीकृष्णस्याऽपि ममैका विज्ञप्तिः कर्तव्या यत् - 'अश्रूणि राधाया नेत्रयो राजेरन् न पुनर्योगीश्वरस्य श्रीकृष्णस्य नेत्रयोरिति' ॥

# जीवस्योद्धरणम्

- सा. श्रीसंवेगरसाश्रीः

एको ग्राम आसीत्। तस्मिन् ग्रामे सर्वे बालास्सहै क्रीडन्ति स्म। शनैः शनैः कालोऽगच्छत् ते च सर्वे वृद्धिं प्राप्नुवन्। तेषां चैको बालो वाणिज्यकृते नगरमगच्छत्। तस्य नाम अमर आसीत्। नगरे तस्य वाणिज्यमवर्धत।

अथैकदा ग्रीष्मावकाशदिवसेषु स्वग्रामं स आगच्छत्। सोऽचिन्तयत्, व्यापारे ममैकस्य जनस्याऽऽवश्यकताऽस्ति। ततोऽन्यतः कुतोऽपि स्थानादहं यदि जनं नयेयं ततोऽपि मम ग्रामादेवैकं जनमहं नयेयं, येन सोऽपि अग्रे गच्छेत्। ततः स मित्राण्याहूयाऽकथयत्- 'युष्मत् सर्वेभ्यः कमप्येकं जनमहं नगरे नेष्यामि। ततो भवन्तः सर्वे मिलित्वा निश्चयं च कृत्वा मां कथयतु, यत् कः आगमिष्यति मया सह ? यो जनश्च मया सह आगमिष्यति, तेन एकादश मासान् तत्रैव वसनीयमिति। द्वादशे च मासे अत्राऽऽगन्तव्यम् '। तस्य कथनं श्रुत्वा सर्वाणि मित्राणि नगरं गन्तुं सज्जीभूतानि। ते सर्वे जनाः सहसाऽवदन्, अहं गमिष्यामि, अहं गमिष्यामि। ततस्तस्मादेकोऽनुभवी जन एवमवदत् - 'बान्धवा ! अस्मासु सर्वेषु असौ सपनोऽध्यापने कुशलोऽस्ति। ततस्स एव नगरं गच्छेत्'। सर्वे जना अपि तस्य सम्मतिमार्पयन्।

अथ निश्चिते काले अमरेण सह सपनो नगरं गन्तुं निर्गतः। तस्य सर्वाणि मित्राण्यपि तस्मिन् दिने प्रसन्नान्यासन्। मार्गे अमरस्सपनमकथयत्, आवां द्वौ मिलित्वा व्यापारे वृद्धिं च कृत्वा अस्माकं ग्रामादन्यौ द्वौ ग्रामजनौ नगरमानेष्यावः। तत्श्रुत्वा सपनोऽपि सम्मतिमार्पयत्। नगरं गत्वा अमरस्सपनमकथयत्, अत्र त्वया गृहकार्यं, गृहस्य शुद्धिः पाककार्यं च करणीयम्। सपनेनाऽपि तस्य वचनं स्वीकृतम्। एवं चैको मासः पूर्णो जातः। अमरस्सपनाय एकसहस्त्रं रूप्यकाणि दत्तवान्। अथ अमरोऽचिन्तयत्, यत् सपनो हि सर्वं गृहकार्यं प्रातःकाले एव करोति। मध्याह्नकाले तस्य पार्श्वे किमपि कार्यं शेषं न तिष्ठति। ततो यद्यहं तं हट्टे नयेयम्, तर्हि स हट्टस्य शुद्धिमपि कुर्यात्। ततस्सपनमाहूय अमर एतदकथयत्। सपनोऽपि तत्कार्यकरणाय प्रसन्नतापूर्वकं सम्मतिमदर्शयत्। एवं च द्वितीयमासोऽपि व्यतीतः। अमरस्सपनाय द्विसहस्त्रं रूप्यकाणि दत्तवान्। अथ अमरो तं योग्यं ज्ञात्वा तृतीये मासे वाणिज्यस्य कागदानि एकस्थानाद् द्वितीये स्थाने नेतुं सपनमकथयत्। एवं तृतीयमासोऽपि पूर्णो जातः। अमरस्सपनाय तस्य कार्यकृते त्रिसहस्त्रं रूप्यकाणि दत्तवान्।

अथ अमरो तं कुशलं ज्ञात्वा चतुर्थे मासे वाणिज्यसामग्रीमेकस्थानाद् द्वितीये स्थाने नेतुं सपनमकथयत्। चतुर्थे मासे च पूर्णे सति अमरस्सपनाय चतुःसहस्रं रूप्यकाणि दत्तवान्। अथ पञ्चमे मासे तु अमरो निजसमानं पदं सपनाय दत्तवान् वाणिज्यमपि तयोः वृद्धिं प्राप्नोत्। षष्ठे मासे सपनो निजं हट्टमक्रीणात्। उत्साहेन सह स वाणिज्यमकरोत्। तस्य कुशलतया वाणिज्यमपि भृशं वृद्धिं प्राप्नोत्। सप्तमे मासे तु सपनो निजं गृहमप्यगृह्णात्। व्यापारे लाभं ज्ञात्वा सपनोऽष्टमे मासे गृहस्य शोभाकृते नवीनवस्तून्यक्रीणात्। तथाऽपि व्यापारोऽवर्धत। नवमे मासे सपनस्तै रूप्यकैर्भागपत्राणि (Shares) अगृह्णात्। दशमे मासेऽपि तान्येव सपनोऽगृह्णात्। सहसा एकादशमासे सपनेनाऽऽनीतानां भागपत्राणां मूल्यमल्पं जातम्। ततो वाणिज्येऽपि तस्य बहुशो हानिर्जाताः ततश्च धनकृते सपनस्तस्य गृहस्य नवीनवस्तूनि व्यक्रीणात्। तस्य गृहमपि व्यक्रीणात्। हट्टमपि व्यक्रीणात्। एतावता एकादश मासाः पूर्णा जाताः। ततस्सपनो द्वादश मासे ग्रामे आगच्छत्। तस्य सर्वाणि मित्राणि तस्य सत्कारकृते प्रसन्नान्यासन्। किन्तु सपनस्त्वधोमुखीभूय शीघ्रमेव स्वगृहं प्रति गतः। तत्र स सर्वाणि मित्राणि विस्तरेण सर्वं वृत्तं कथितवान्। तच्छ्रुत्वा सर्वाणि मित्राणि सपनमकथयन्, तव स्थाने यद्यन्यत् किमपि मित्रं नगरं गच्छेत्, तर्हि शोभनं भवेत्। त्वं तु यादृश आसीः तादृश एवाऽऽगतः। समयमपि व्ययीकृतवान्। तेषां वचनं श्रुत्वा सपनस्य बहु दुःखं संजातम्।

अत्र ग्राम इति अव्यवहारराशिः, मित्राणि इति अव्यवहारराशौ वसन्तो जीवाः। नगरमिति व्यवहारराशिः, अमर इति सिद्धजीवः सपन इति स्वयम्, एकं सहस्रं रूप्यकमिति एकेन्द्रियत्वमित्यादि।

अव्यवहारराश्याः निर्गत एको जीवो मोक्षं गतः। स अन्यमेकं जीवमव्यवहारराश्याः बहिरानीतवान्। अथ तस्य जीवस्य विकासस्य प्रारम्भो जातः। प्रथमं तु स एकेन्द्रियत्वं प्राप्नोत्। पश्चादनुक्रमेण द्वीन्द्रियत्वं, त्रीन्द्रियत्वं, चतुरिन्द्रियत्वं च स प्राप्नोत्। स्वामिसमस्थितिरिति पञ्चेन्द्रियत्वमपि स प्राप्नोत्। अग्रे वर्धमानश्च स जीवस्सम्यक्त्वं, देशविरतिं, प्रमत्तत्वं, अप्रमत्तत्वं, च ततश्च आत्मनो विशुद्धिं प्रापन् स जीवोऽष्टमगुणस्थानके श्रेण्यामारोहणं करोति। विशुद्धः स जीवो यत्र सर्वेषां जीवानामेकोऽध्यवसायो वर्तते, तादृशं नवमं गुणस्थानकमपि प्राप्नोत्। अथ सूक्ष्मकषायवान् स जीवस्सूक्ष्मसंपरायं नाम दशमं गुणस्थानकं प्राप्नोत्। वीतरागस्सदृशः स जीव एकादशं गुणस्थानकं प्राप्नोत्। किन्तु अन्तर्मुहूर्तपर्यन्तमेव।

तत्पश्चादुपशान्त-मोहनीयकर्मणामुदयात् स एकादशाद् गुणस्थानकात् पतित्वा मिथ्यात्वं नाम प्रथमं गुणस्थानकं प्राप्नोत्। पुनश्चाऽव्यवहारराशिमध्ये गतः।

तत्र अव्यवहारराशौ वसन्तो जीवास्तं जीवं अकथयन् – तव स्थाने अन्यो जीवो बहिर्गच्छेत्, तर्हि शोभनं भवेत्। अस्माकं त्वेवं प्रतिभातं, यत् त्वं सिद्धो भविष्यसि, अस्मच्च कमप्येकं जनं बहिरानेष्यसि, किन्तु त्वं तु यादृश आसीः, तादृश एव पुनरागच्छः। वराकस्स जीवः !! कीदृशी करुणता... पुनस्तस्य भवभ्रमणं प्रारब्धम्। मनागपि प्रमादो जीवं भवे भ्रामयति। ततो हे जीव ! प्रमत्तगुणस्थानकं प्राप्य अस्य जीवस्य सदृशी तव परिस्थितिर्न भवेत्, इत्येतदर्थं योग्यमाचरणं कुरु। आत्मशुद्धौ लक्ष्यमानीय सर्वां क्रियां कुरु। परमात्मन आलम्बनेन च त्वमात्मनः शुद्धस्वरूपं प्राप्नुहि।

# परमार्हतः कविर्धनपालः

- सा. निसर्गप्रज्ञाश्रीः

भोजराजस्य सभायां विद्यमानेषु मूर्धन्यकविष्वन्यतमो धनपाल आसीत् । तस्य लघुभ्राता शोभनः पितृवचनपरिपालनार्थं जैनदीक्षामङ्गीकृत्य मुनिरभवत् । एतेन धनपालोऽतीव क्रुद्धोऽभवत् । तन्मानसे जैनधर्मं प्रति द्वेषः समुत्पन्नः । स भोजराजं कथयित्वा धारानगर्यां जैनमुनीनां प्रवेशस्य प्रतिबन्धं कारितवान् ।

इतश्च शोभनो मुनिः शास्त्राणि सम्यगधीत्य महाविद्वान् वरकविश्चाऽभवत् । स निजभ्रातुर्जैनद्वेषं ज्ञात्वा तन्निवारणार्थं भ्रातृप्रतिबोधनार्थं च गुरोरनुज्ञां प्राप्य धारानगरीं प्राप्तः । तत्र च स्वभ्रातृगृहं यावत् प्राप्तस्तावता सम्मुखमेव धनपालो मिलितः । तेनाऽपि जैनमुनिं दृष्ट्वा लघुभ्रातृतया चाऽनभिज्ञाय सोपहासं पृष्टं - "भोः ! गर्दभदन्त ! भदन्त★ ! सुखं ते ? " मुनिनाऽपि सोपहासमेव प्रतिपृष्टं तस्य - "भो ! मर्कटकास्य ! वयस्य प्रियं ते ? " एतन्निशम्य धनपालः किञ्चिदिव विलक्षोऽभवत् । तदा स सम्यग् विलोक्य निश्चितवान् यदयं तस्य लघुभ्राता शोभनोऽस्तीति ।

ततस्तं गृहे आकार्य स्वभार्यां तस्मै किञ्चिद्दानार्थं कथितवान् । साऽपि तस्याऽग्रे मोदकान् गृहीत्वोपस्थिता । अनेनोक्तं - 'एते न कल्पन्ते ममाऽऽदातुम् ।' तदा किञ्चिदमर्षेण धनपालः 'किमिमे विषमिश्रिता वा ? येन न गृह्णासी'ति पृष्टवान् । 'आमि'ति च मुनिना कथिते स ततः कणद्वयं गृहमार्जारस्य खादितवान् । सोऽपि तस्मिन् भुक्तमात्रे मूर्च्छितो भूत्वा पतितः । तदा विस्मितो धनपालोऽपृच्छत् - 'भवता कथमत्र विषं ज्ञातम् ?' मुनिनोक्तं - 'यदा विषमिश्रितमन्नं चकोरकः पक्षी पश्यति तदा स विरसं चीत्करोति । भवतो गृहसमीपस्थे वृक्षे एव चकोरकः समुपविष्टोऽस्तीति तेन चीत्कृतं मोदकानेतान् पश्यता । ततो मया ज्ञातम् ।' धनपालेन चिन्तितं - 'नूनमयं मेधावी विद्वांश्च मुनिः ।' तस्य तस्मिन् समादरो जातः ।

ततस्तस्य पत्नी दधि तस्मै दातुमुद्युक्ता । मुनिनां पृष्टं - 'कति दिनान्यस्य जातानि ? ' तयोक्तं - 'दिनत्रयम्' । तदा मुनिना निषिद्धे तस्मिन् धनपालोऽवदत् - 'किमत्र दध्नि कृमयः सन्ति येन निषिध्यते भवता ?' 'कामं सन्ती'ति कथयित्वा मुनिना अलक्तरस आनायितो दध्नि च निक्षेपितः । द्रागेव दध्नि चलन्तः

★ **भदन्त** - इति जैनसाधूनां सम्बोधनम् । (प्राकृतभाषायां **भंते** ! इति) ॥

श्वेतवर्णा कृमयो दृष्टिगोचरा जाताः । एतद् दृष्ट्वा धनपालो 'जैनधर्मेऽहो ! ईदृशी सूक्ष्माऽहिंसा निर्दिष्टाऽस्ती'ति विचिन्त्य जैनधर्मे द्वेषं त्यकत्वा समादरवान् जातस्ततत्त्वानि सिद्धान्तांश्च सम्यगवबुध्य परमार्हतः श्रावको जातः ।

अन्यदा तेन ऋषभदेवाख्यस्य प्रथमतीर्थकृतश्चरितनिबद्धं महाकाव्यं रचितम् । तत्काव्यं च स भोजराजस्य दर्शितवान् । तद् विलोक्य भोजराजेन कथितं – भोः कवे ! यदि भवान् महाकाव्येऽत्र ऋषभदेवस्य स्थाने मदिष्टदेवस्य नाम, भरतस्य स्थाने मन्नाम, विनीतानगर्याश्च स्थाने धारानगरीं नियोजयेत् तदा भवते लक्षं सुवर्णमुद्राः पारितोषिकरूपेण दद्याम् ।' धनपालस्तन्नाऽङ्गीकृतवान् । अतः क्रुद्धो भूपालस्तत्काव्यस्य लिखितां प्रतिमग्नौ प्रक्षिप्तवान् । समग्रमपि काव्यं भस्मसाज्जातम् । द्वितीया प्रतिस्तु नाऽऽसीत् । कविस्तु दुःखितोऽभवत् गृहं च प्राप्तः ।

तं दुःखिनं विषण्णमन्यमनस्कं च दृष्ट्वा तस्य पुत्री तिलकमञ्जरी नाम तं विषादकारणं पृष्टवती ! तेनाऽपि यथावत् सर्वं कथितम् । तदा तयोक्तं – 'पितः ! मा कार्षीच्चिन्ताम् । प्रत्यहं भवता यावान् काव्यांशो लिख्यते स्म तमहं पठामि स्म । ततश्च यथाक्रमं समग्रमपि काव्यं मम स्मृतौ यथातथमङ्कितमस्ति ।' भवान् तत् पुनरपि लिखितु, अहं लेखयिष्यामि ।' अत्यन्तं हृष्टेन धनपालेन ततस्तन्महाकाव्यं पुनरपि लिखितं स्वपुत्र्याः साहाय्येन, तदभिधानं च तस्या नाम्ना "**तिलकमञ्जरी**" इति कृतम् । एतच्च काव्यमद्याऽपि समुपलब्धमस्ति प्रकाशितं चाऽपि वर्तते ॥

# मर्म नर्म

**- कीर्तित्रयी**

- भवतो वयः किम् ?
+ नाऽहं जानामि !
- कथमिव न जानाति भवान् ?
+ प्रत्यहं तत् परावर्तते, तत् कथं जानीयाम् ?

**न्यायाधीशः** त्वयैतस्य धनं चोरितं ननु ?
**अपराधी** नैव महोदय ! अनेन स्वहस्तेन मे धनं दत्तम् ।
**न्यायाधीशः** अहो ! एवं वा ? कदाऽनेन ते धनं दत्तम् ?
**अपराधी** यदा मयाऽस्य छुरिका दर्शिता तदा महोदय !

**रमणः** भोः ! सखे ! अस्मिन् वर्षेऽहं पुनरप्यनुत्तीर्णो जातः । इदानीं किं करवाणि ? पित्रे कथमिव कथयानि ? न किञ्चित् ज्ञायते !!
**गमनः** चिन्ता माऽस्तु भोः ! तव पितुर्जङ्गमदूरभाषे लघुसन्देशमेकं (SMS) प्रेषय - "परिणामो घोषितः, गतवर्षे इव अस्मिन् वर्षेऽपि सातत्यपूर्णं प्रदर्शनम् ।"

**शिक्षक:** सर्वेषु जामितामनुभवत्स्वपि नीरसतां जनयन्ति वाक्यानि वदन् यो नैव विरमति स कः स्यात् ?
**रमण:** "अध्यापकः " महोदय !

**चिकित्सालये सूचनाफलकम्-**

- धूमपानेन भारस्य परिहाणिर्भवति (weight-loss)
- शरीरात् फुप्फुसयोर्हानिर्भवति !!

नापितापणे फलकं लम्बमानमासीत् -
"अस्माकं व्यवसायो भवतां मस्तकमवलम्बते ।"

- अये ! अम्ब ! मां भ्रमरोऽदशत् ।
+ तत्र किञ्चनौषधं लेपयतु ।
- किन्तु भ्रमरस्तूड्डीनः !!

- यदाऽप्यहं चिन्तयामि तदाऽऽश्चर्यचकितो भवामि यद्-येन प्रथमं घटिकायन्त्रं निर्मितं तेन तत्र समयः कथं विन्यस्तः - इति ।

अस्मिन् जगति चतुरङ्गक्रीडैवैकाऽस्ति या पत्युः परिस्थितिं सम्यग् निरूपयति । अस्यां क्रीडायां राजा (पतिः) एकस्मिश्चारे एकमेव पदमग्रे सर्तुं शक्नोति कस्यामपि दिशि । एतद्विपर्यासेन महाशक्तिशालिनी राज्ञी (पत्नी) एकस्मिश्चारे यथेच्छं पदान्यग्रेसर्तुं शक्नोति कस्यामपि दिशि !!

(ग्राहकः कुत्रचिदापणे विविधमुपस्करं क्रेतुमादिशति)

**आपणिक:** यदा भवान् पूर्वं गृहीतस्योपस्करस्य देयं धनं दास्यति तदैवैष उपस्करो भवद्गृहं प्रापयिष्यते ।
**ग्राहक:** एतावतीं प्रतीक्षां कर्तुं नैव सिद्धोऽहम् । आदेशो निरस्यते !! (Order Cancelled)

# हास्यकणिका:

– मुनिश्रुताङ्गचन्द्रविजय:

(एको बालो हस्ते हिमखण्डमेकं गृहीत्वाऽतिनिरीक्षया पश्यन्नासीत् । एतादृशं तं दृष्ट्वा)

**अपरो बाल:** भो: ! अस्मिन् हिमखण्डे किं पश्यन्नसि त्वम् ?

**प्रथमो बाल:** अस्मात् खण्डान्निरन्तरं जलं स्रवति । तदहं पश्यन्नस्मि यत् कुत्र छिद्रं वर्तते !!

**एप्रिल-मासस्य प्रथमे दिनाङ्के**

केऽपि परिणीता: पुरुषा न वञ्चयितव्या: । यतस्ते सर्वे पूर्वमेव वञ्चिता: श्वसुरपक्षेण !!.

**पत्नी** भवान् अतीव सरलोऽस्ति । कोऽपि जनो भवन्तं वञ्चयितुमर्हति ।

**पति:** तस्य प्रारम्भस्तु भवत्या: पित्रैव कृत: ।

**भिक्षुक:** स्वामिन् ! एकं रूप्यकं ददातु । केवलमेकं रूप्यकम् ।

**श्रेष्ठी** श्वो दास्यामि । श्व आगच्छतु ।

**भिक्षुक:** किं वदेयं भो: ! ? श्व: श्व: – इति वचनदानेन तु मम लक्षं रूप्यकाण्येतस्यां प्रतोल्यां ग्रहीतव्यानि शिष्टानि !!.

प्राकृतविभागः

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितं

# प्राकृतद्व्याश्रयमहाकाव्यम्

## द्वितीय सर्गः

पङ्कय-केसर-कन्ती अकिलिन्नो हरि-चवेल-चविलो सो ।
स-किसर-किलित्त-दामो निवो पयट्टो समं काउं ॥ १ ॥

गुरु-मण-थेणो रेवइ-देअर-सीअ-दिअराण बल-थूणो ।
काही विअणं सो सयमवेअणो मल्ल-सेलाण ॥ २ ॥

तस्स सणिच्छर-पिउणो व्व कर-हयं सिन्धवं व मल्ल-कुलं ।
धम्म-जलोल्लं जायं स-सिन्न-पर-सेन्न-महिअं पि ॥ ३ ॥

मुर-वेरिओ व्व रक्खिअ-दइच्च-कय-वइर-दइवय-सइन्नो ।
गेण्हीअ स तत्थ धणु कइलास-सओ व्व केलासे ॥ ४ ॥

देव्वालक्खो दइवे वि असङ्को महि-अले नव-दइव्वं ।
उच्चअ-नीचअ-लक्खे अणचुक्को अवर-धीर-हरो ॥ ५ ॥

अन्नन्नं जोहेहिं सलाहिओ तह बुहेहि अन्नोन्नं ।
मण-हर-सरलिअकुञ्चिअ-उहय-पवट्टो सरे वुट्टो ॥ ६ ॥

कण्णो वलिअ-मणोहर-पउट्ठकर-सररुहेण नर-वइणो ।
लम्बिर-नाल-सरोरुहवतंसिओ व्वासि संधाणे ॥ ७ ॥

कय-दुज्जण-सिर-विअणं सिर-कुसुमाहरणमणसिरो-विअणं ।
आवज्जिअ-वाइअ-आउज्जस्सादिट्ठ-पुड-दलणं ॥ ८ ॥

सूसास-वलिअ-चिबुओ अकासि सो गउअपुच्छपमुहेहिं ।
गाअङ्क-कोञ्चरिउ-सुन्देरं पत्तो धणुह-सुण्डो ॥ ९ ॥

# प्राकृतद्व्याश्रयमहाकाव्यस्य
## संस्कृतानुसर्जनम् (संस्कृत पद्यानुवाद:)

- पं. नरेन्द्रचन्द्र-झा

### द्वितीय सर्ग:

पङ्कजकेसरकान्तिः सिंहचपेटाचपेटकोऽक्लिन्नः ।
क्लृप्तसकेसरदामा सोऽथ प्रवृत्तः श्रमं कर्तुम् ॥१॥

गुरुचित्तहरो रेवति-सीतादेवरकयोर्बलस्तेन ।
पीडां चकार स स्वयमक्लान्तो मल्लशैलानाम् ॥२॥

तस्य शनैश्चरपितुरिवमल्लकुलं करहतं यथा लवणम् ।
घर्मजलार्द्रं जातं स्वपरसैन्याार्च्यमपि कामम् ॥३॥

मुरवैरीव त्रात ! दानवविद्वेष ! देवतासैन्यः ।
तत्राऽग्रहीत् सचापं कैलासे हरो यथा राजा ॥४॥

दैवालक्ष्यो दैवेऽशङ्कः पृथिवीतले नवो दैवः ।
उच्चावचेऽपि लक्ष्येऽस्खलितो विपक्षधृतिहरणः॥५॥

अन्योन्यं खलु योधैर्दैवतवर्गैः प्रशंसितोऽत्यर्थम् ।
सुन्दरसरलितकुञ्चितयुगलप्रकोष्ठः शरान् वृष्टः ॥६॥

कर्णौ वलितमनोहरप्रकोष्ठकरसरसिजेन सम्राजः ।
लम्बितनालसरोरुहशेखरितो यस्य सन्धाने ॥७॥

कृतखलमस्तकपीडं मौलौ कुसमावतंसितोऽपीडम् ।
आतोद्यिकसंवदितमुरजादीनामदृष्टपुटदलनम् ॥८॥

सोच्छ्वासवलितचिबुकश्चक्रे गोपुच्छमुख्यबाणौघैः ।
हरभार्गवसौन्दर्य्यं कार्मुककुशलोऽमितं प्राप्तः ॥९॥

अह कुच्छेअय-हत्थो कोच्छेअय-कउसलेण सो दिट्ठो।
कोवेस कउच्छेअय-सिद्धो ति असेस-पउरेहिं ॥ १० ॥

अब्भास-गारवेणं गोविअ-सव्वङ्ग-गउरवो फलए।
नावाकारे तेरह-तेतीस-गुणो व्व सो आसि ॥ ११ ॥

घडिआ अथेर-एक्कारएहि बहुएहिं दुव्वहा सत्ती।
वेइल्ल-केल-कन्नेरयं व भामिय भुवि निहित्ता ॥ १२ ॥

विअइल्ल-कण्णिआरय-कयलेहिं ऐ-अइ त्ति भणिरेहिं।
जोहेहि बोर-पोप्फल-पोरं-मन्नेहिं सा महिआ ॥ १३ ॥

नोमालिअ-नोहलिआ-सोमालिहं सलोप-मोहाहिं।
तस्सोब्भमिअं लवणं सुकुमाल-मऊह-मालिस्स ॥ १४ ॥

चोद्दह-मणु-चोग्गुणओ भुवण-चउद्दहय-वइ-चउग्गुणओ।
चोत्थे वि जुगे ति-पुरिस-चउत्थओ लक्खिओ स तया ॥ १५ ॥

सागोक्खल-खइरोहल-लोहोऊखल-सिला-उलूखलया।
चक्केण तेण दलिआ चोव्वारं पुण चउव्वारं ॥ १६ ॥

इअ रइअ-कोउहल्लो कोहल-दक्खेहिँ तक्किओ राया।
उअ कण्हो एस इहं भरहेसर-चक्कवट्टी ओ ॥ १७ ॥

ओआरे अवयार-क्खमेण तेणावसद्द-रहिएण।
सेल्ल-कला-अवयासे भग्गो जोहाण ओआसो ॥ १८ ॥

पन्नास-पलोऽवगओ किं जलणो उअ रवि त्ति तस्स करे।
उवहसिअ-परसुरामस्सूहसिअ-पवी महा-परसू ॥ १९ ॥

सूल-कलाइ णुमण्णो सीर-णिसण्णो अ कित्ति-पंगुरणो।
सो किच्ची-पाउरणं सिइ-पावरणं च अणुकाही ॥ २० ॥

अह राय-वाडिअत्थं नाओ आणाइओ रिउ-घरट्टो।
पुहइ-सईसेणागरु-सुरहि-मओ सुकुसुम-सुतारो ॥ २१ ॥

सचमर-कण्णो विदुरो गय-पावो देव-दुज्जओ विजणे।
सो धरिओ पर-वारण-कवलण-नत्तंचर-चरित्तो ॥ २२ ॥

अथ कौक्षेयकहस्तः कौक्षेयककौशलेन दृष्टः सः ।
कोऽप्येष खड्गसिद्धपुरुष इतीत्थं समैः पौरैः ॥१०॥

अभ्यासगौरवेण गोपितसर्वाङ्गगौरवः फलके ।
षडधिकचत्वारिंशद्गुण इव नावाकारेऽभवत्सोऽपि ॥११॥

तरुणायस्कृद्वृन्दैर्बहुभिर्घटिता च दुर्वहा शक्तिः ।
विचकिलः कदलव्यूहं भ्रमयित्वेवोपरि क्षिप्ता ॥१२॥

भो भो इति ब्रुवाणैर्विचकिलकदलीमुखैश्च फलपुष्पैः ।
कर्कन्धुपूगमानिभिरतुलं महिता च सा योधैः ॥१३॥

नूतनफलनवमल्लीसुकुमाराभिः सकान्तिकिरणाभिः ।
तस्योद्भ्रमितं लवणं कोमलभाशालिनस्तस्य ॥१४॥

सर्वमनुचतुर्गुणको भुवनचतुर्दशकपतिचतुर्गुणः ।
तुर्येऽपि युगे त्रिपुरुषचतुर्थको लक्षितः स तदा ॥१५॥

शाकखदिरलोहानां शिला विरचिता उलूखलाः सर्वे ।
चक्रेण तेन दलिता भूयोभूयश्चतुर्वारम् ॥१६॥

इति कृतकुतूहलौघः कौतुककुशलैश्च तर्कितो राजा ।
किं कृष्ण एष लोके ? भरतेश्वरचक्रवर्ती किम् ? ॥१७॥

अपकारिष्वपकारक्षमेण तेनाऽपशब्दरहितेन ।
सत्प्राससकलाभ्यासे भग्ना स्फूर्तिः सुयोधानाम् ॥१८॥

पञ्चाशत्पलमानो ज्वलनः किं किं रविः करे तस्य ? ।
उपहसितभार्गवस्योपहसितपविरपि महापरशुः ॥१९॥

सूलकला विनिषण्णः सीरनिषण्णश्च कीर्तिप्रावरणः ।
स कृत्तिप्रावरणं शितिप्रावरणं जहास मुदा ॥२०॥

अथ राजपाटिकार्थं नागोऽप्यानायितोऽरिसम्मर्दः ।
पृथिवीन्द्रेण तदाऽगरुसुरभिमदः सुमाभरणः ॥२१॥

सचमरकर्णो विदुरो गतपापे देवदुर्जनो विजने ।
सोऽपि धृतः परवारणकवलननक्तञ्चराचारः ॥२२॥

बालक्क-मुहो सुहकर-गज्जी सुहयर-गई अ इअ थुणिओ ।
जग-आगमिओ बहुतर-आअमिअ-कलेहिं बहुअरयं ॥ २३ ॥

जलयर-अजलचर-वई जस्स य इंधं रुसा-पिसाजी सो ।
सुहदेसु वि सुहओ जइ एरिसओ सो उण सुरेहो ॥ २४ ॥

अमुगो कर-आउण्टण-रम्मो चाउँण्ड-काउँए तुट्ठे ।
लब्भइ अणिउँत्तय-सुरहि-जउँण-जल-बहुल-मय-वट्टो ॥ २५ ॥

अइमुंतय-बिन्दु-करो अइमुत्तय-गोर-दन्तओ एस ।
सविमो खु साव-चविओ तिअस-गय-वरो महि-अलम्मि ॥ २६ ॥

अच्छ-कय-कण्ण-चिउओ महु-पिंगल-नयणओ मयंक-नहो ।
पियइ व लायण्णमिमो अखुज्ज-कुम्भो पर-गयाण ॥ २७ ॥

खप्पर-खीलय-कुज्जय-कुसुम-समा जस्स सेलं-खम्भ-दुमा ।
रुन्धिअ-खासिअ-छिक्कं पिक्खिज्जइ मय-गलो एस ॥ २८ ॥

मरगय-गेन्दुअ-सरिसालि-गुच्छ-गण्डे निवो इहारूढो ।
जयइ चिलाए व्व परे सिरिकण्ठ-किराय-वीरे वि ॥ २९ ॥

जिअ-धण-सीभर-गङ्गा-सीहर-चन्दिम-सुसीअ-सीअरओ ।
फलिहामल-वीस-नहो निहस-प्पह-चिहुरओ एस ॥ ३० ॥

पिहु-जहणो साहु-मुहो सरिसव-खल-कडुअ-सलिलओ अथिरो ।
इह एसो निव-जोग्गो पत्तो चोत्थि मयावत्थं ॥ ३१ ॥

निव-धम्म-रओ अह सो नभम्मि पाउस-घणो व्व पिधमिन्दो ।
अपिहं व आसणाओ असंकलं तं समारूढो ॥ ३२ ॥

पुन्नाम-दामवन्तो पुलोइओ भामिणीहि पउरीहिं ।
छालंक-देव-तेओ सुहओ रइ-सूहवो व्व निवो ॥ ३३ ॥

इन्दो दुहओ चन्दो वि दूहवो आसि खेअर-वहूणं ।
तस्सि दिट्ठे तइआ मणि-खसिआहरण-खइअंगे ॥ ३४ ॥

वेस-पिसाओ मुत्ती-पिसल्लओ अ झडिलो अजडिलो य ।
खट्टंग-घण्ट-भूसो निवारिओ न जह अटइ पुरो ॥ ३५ ॥

बालार्कमुखः सुखकरगर्जिः सुखकरगतिः स्तुतश्चेति ।
जगदागमितो बहुतरसंज्ञातकलाभिरत्यर्थम् ॥२३॥

पतिर्जलस्थलचरयोर्यस्य चिह्नं रुषापिशाची सः ।
मित्रेष्वपि सुभगो यदि तादृक् त्वैरावणो नाऽन्यः ॥२४॥

सकराकुञ्चनरम्यो नृत्यति संप्राप्यते शिवे तुष्टे ।
अतिमुक्तसुरभियामुनजलमदपट्टो महातेजाः ॥२५॥

अतिमुक्तकबिन्दुकरोऽप्यतिमुक्तकगौरदन्तवानेषः ।
शापच्युतोऽप्यसौ खलु, देवगजाभो महीपृष्ठे ॥२६॥

अच्छकचकर्णचिबुको मधुपिङ्गललोचनो मृगाङ्कनखः ।
पिबतीव हि लावण्यं परगजवृन्दस्य कुम्भोच्चैः ॥२७॥

कर्परकीलककुब्जककुसुमसमा यस्य नगस्तम्भनगाः ।
रुद्धक्षुतकाशितको मदोत्कटः प्रेक्ष्यते ह्यशेषः ॥
मरकतकन्दुकसदृशालिगुच्छगण्डे नृपः समारूढः ।
भिल्लानिव जयति परान् श्रीकण्ठकिरातवृन्दवीराभान् ॥
जितघनशीकरगङ्गाशीकरचन्दिरसुशीतशीकरकः ।
स्फटिकामलसर्वनखो निकषभ्रमकुन्तलोऽप्येषः ॥२८-२९-३०॥

पृथुजघनः साधुमुखः सर्षपखलकटुकसलिलकश्चपलः ।
नृपयोग्यः खल्वेष प्राप्तस्तुर्यां मदावस्थाम् ॥३१॥

अथ भूपतिधर्माऽसौ गगने प्रावृड्घनो यथा पृथगिन्द्रः ।
अपृथगिवासनपद्मा-दनिगडकं तं समारूढः ॥३२॥

पुन्नागदामशाली पौराभिर्भामिनीभिरभिदृष्टः ।
छागाङ्कदेवतेजाः सुभगो रतिवल्लभो राजा ॥३३॥

इन्द्रो दुर्भग आसीत्सुरवनितानां तथैव चन्द्रोऽपि ।
तस्मिन् तदा हि दृष्टे मणिखचिताभरणखचिताङ्गे ॥३४॥

वेशपिशाचो मूर्त्या भीषणदृष्टिस्तथा पुनर्जटिलः ।
खट्वाङ्गघण्टभूषो रूद्धे नाऽटति यथा पुरतः ॥३५॥

केढव-सयढारि-सढाल-विक्कमो फलिह-विमल-नेवच्छो ।
चविला-फालिअ-कुम्भो नहं व चविडाइ फाडंतो ॥ ३६ ॥

अंकोल्ल-तेल्ल-णिद्धो असढो पिहडो कलाण सयलाण ।
लहु-जढर-पिढर-पडियार-पाडणत्ताण कय-कीलो ॥ ३७ ॥

दढ-खन्ध-हार-नाडिं पेल्लन्तो निविड-कच्छ-नालिमिभं ।
उव्वेलु-अचुच्छंकुस-अछुच्छ-वेणूहि आवरिओ ॥ ३८ ॥

अणतुच्छ-टयर-कप्पूर-धूव-महमहिअ-टसर-सुइ-वत्थो ।
कुमर-विहारे पत्तो टूवर-पडिहार-दिन्न-करो ॥ ३९ ॥

सुपइट्ठं सुपडायं वेडिस-दल-नील-भित्ति-गब्भिणयं ।
अणिउँत्तय-फुल्ल-हरं बालाण वि रुण्ण-अवहरणं ॥ ४० ॥

बाहत्तरि-कल-सालाहण-सम-जणमलसि-कुसुम-कय-सोहं ।
पलिल-सिर-पलिअ-पीवल-करण-घुसणुमीस-ण्हवण-जलं ॥ ४१ ॥

पीअल-धाउ-विणिम्मिअ-विहत्थि-पम-माहुलिंग-आहरणं ।
भरह-जिण-भवण-सरिसं मंगल-वसहिं सिरी-वसइं ॥ ४२ ॥

अध काहल-भव्व-जणं सिढिलिअ-कलि-कालमसढिलाणन्दं ।
नयरस्स मेढिमूयं पढमं तित्थं व पुढवीए ॥ ४३ ॥

पुहवी-निसीढ-तम-भर-निसीहिणीनाह-सरिस-जिण-बिम्बं ।
खण्डिअ-डम्भिअ-दम्भं उद्दण्ड-सुवण्णमय-डण्डं ॥ ४४ ॥

डरिआणं दर-हरणं डड्ढागरु-दड्ढ-धूव-सुह-गन्धं ।
अहि-डसण-डट्ठ-सरणं दसण-कवाडंसु-दट्ठ-तमं ॥ ४५ ॥

डाहत्त-दाह-हरणं कय-डोहलयाण पुत्र-दोहलयं ।
कडण-मइ-चत्त-कदणं डब्भंकुर-नील-नीलमणिं ॥ ४६ ॥

दब्भग्ग-मई दर-डोलिर-सीसमदोलिरेण हिअएण ।
दूरमहरं डसन्ते डहमाणो मिच्छ-दिट्ठि-जणे ॥ ४७ ॥

केशवसकटारिसटालविक्रमः स्फटिकविमलनेपथ्यः ।
पातितकुम्भोऽथ पाटयन् गगनं च चपेटयाऽक्लान्तः ॥३६॥

पिठरः सकलकलानामशठोऽङ्कोठस्य तैलवत्स्निग्धः ।
लघुजठरपिठरप्रतिकारपातनार्तविहितलीलः ॥३७॥

स्कन्धदृढहारनाडिं प्रक्षिप्यन् निबिडकक्षनाडिमिभम् ।
उद्वेण्वतितीव्राङ्कुशवेणुभिरभितो वृतः कामम् ॥३८॥

कालागरुकर्पूरधूपमहमहितनगरशुचिवस्त्रः ।
प्राप्तः कुमारचैत्ये तूवरप्रतिहारधृतपाणिः ॥३९॥

सुप्रतिष्ठं सुपताकं वेतसदलनीलभित्तिगर्भितकम् ।
अतिमुक्तकफुल्लगृहं रोदनहरणं कुमाराणाम् ॥४०॥

अतसीसुमकृतशोभं द्वासप्ततिकलमतीव जनसौख्यम् ।
पीतकरं पलितानां कुङ्कुममिश्रस्नपनसलिलम् ॥४१॥

अतिपीतधातुनिर्मितवितस्तिमितमातुलिङ्गभूषणकम् ।
भरतजिनभवनसदृशं मङ्गलवसतिं श्रियोवसतिम् ॥४२॥

अथ कातरभव्यजनं शिथिलितकलिकालमशिथिलानन्दम् ।
नगरस्य नाभिभूतं प्रथमं तीर्थं यथा जगतः ॥४३॥

पृथिवीनिशीथतामस-रजनीनाथाभसौम्यजिनबिम्बम् ।
खण्डितदाम्भिकदम्भं प्रोद्दण्डस्वर्णमयदण्डम् ॥४४॥

दरितानां दरहरणं दग्धागरुदग्धधूपशुभगन्धम् ।
अहिदशनदष्टसरणं दशनव्याजक्षतध्वान्तम् ॥४५॥

दाहार्तदाहहरणं सदोहदानां च पूर्णदोहदकम् ।
कदनमतिमुक्तकदनं दर्भाङ्कुरनीलरत्नाभम् ॥

कुशाग्रबुद्धिरीषद्दोलितशीर्षं विकम्पहृदयेन ।
प्रदशन्नधरं दूरं प्रदहन् मिथ्यात्विनो लोकान् ॥४७॥

थुणिरो देवं बारह-रवि-तेअं भत्ति-गग्गर-गिराए।
धम्म-करि-करलि-हूओ कयलि-मिऊ कोह-अपलित्तो ॥ ४८ ॥

दोहल-दुउणिअ-धाराकयम्ब-धूलीकलम्ब-कंटइओ।
धिप्पिर-सुवन्न-दिप्पिर-तणु-कन्ति-कवट्टिअन्न-पहो ॥ ४९ ॥

चइउं निव-कउहाइं निसढाइ-निवाण धम्म-सिक्खाओ।
ओसहमोसढिओ इव दिन्तो स निसीहिअं काउं ॥ ५० ॥

निअ-नामंकिअ-णिअ-कित्तणयं अनिला व्व अतुल-थामेण।
पज्जलिआनल-तेओ भत्तीइ तओ पइट्ठो सो ॥ ५१ ॥

लिम्बासय-निम्बगिरा कलि-ण्हाविअ-पाव-नाविआदरिसा।
धम्म-रिउणो वि तंसि दिट्ठे धम्मोम्मुहा हूया ॥ ५२ ॥

सो फणस-फालिहद्दय-दीहर-भुअ-फलिह-जोडिअ-णडालो।
अफरुस-गिराइ फालिअ-मोहो इअ जिण-थुइमकासि ॥ ५३ ॥

फलिहा-जलं वहुत्तम्बुजेहि जह जह वणं च नीमेहि।
जग-सिरि-नीवावेडय सहइ मही तह तुह पएहिं ॥ ५४ ॥

तुह कय-कुसुमामेला पणट्ठ-पारद्धि-पमुह-पाव-मला।
मुत्ताहल-विमला इह हवन्ति रेभ व्व मुद्धन्ना ॥ ५५ ॥

सहलो जम्मो सभलं च जीविअं ताण देव फणि-चिन्ध।
जे तं चम्पय-सवलेहिं मिसिणि-कुसुमेहिँ अच्चन्ति ॥ ५६ ॥

असिर-कमन्धे अकयन्ध-सिरे समरम्मि तुज्झ झाणेण।
केढव-रिउणो व्व निवा विसढाविसमं न जाणन्ति ॥ ५७ ॥

वम्मह-पिआहिवन्नू अहिमन्नु-पिआ य अहरिओ तेण।
तुह भसल-साम पय-पंकएसु भमराइअं जेण ॥ ५८ ॥

पहु तुम्हकेर-अह-खाय-संजमे सोवओग-साहूण।
न समो अह जाओ तव-किसंग-लट्ठी वि हु कुदिट्ठी ॥ ५९ ॥

स्तोता देवं द्वादशरविकान्तिं भक्तिसंस्खलद्वाग्भिः ।
कदली धर्मगजानां कदलिमृदुः क्रोधनिर्मुक्तः ॥४८॥

द्विगुणितदोहदधाराकदम्बधूलीकदम्बकण्टकितः ।
उज्ज्वलसुवर्णदीप्रतनुकान्तिकदर्थितान्यरुचिः ॥४९॥

त्यक्त्वा नृपककुदानि निषधादिनृपस्य धर्मसंशिक्षाः ।
औषधमिव चौषधिकः सददन्नैषेधिकीं कृत्वा ॥५०॥

निजनामाङ्कितभवनं यथा नभस्वानपूर्वसारेण ।
प्रज्वलितानलतेजास्तद्भक्त्या ततः प्रविष्टः सः ॥५१॥

कुटिलाशयकुटिलवयाः कलिपातकमूर्खनापितादर्शाः ।
धर्मारयोऽपि तस्मिन् दृष्टे धर्मोन्मुखा भूताः ॥५२॥

पनसपारिभद्रदीर्घबाहुपरिघनियोजितललाटः सः ।
अपरुषवचसा पाटितमोहो जिनसंस्तुतिं चक्रे ॥५३॥

परिखाजलं प्रभूतकमलैर्विपिनं यथा यथा नीपैः ।
नीपकुसुमशेखर ! तव पादैर्मही तथा भाति ॥५४॥

तव कृतकुसुमापीडा नाशितपापर्धिमुख्यवृजिनौघाः ।
मुक्ताफलविमला इह रेफा इव भवन्ति मूर्धन्याः ॥५५॥

सफलं जननं तेषां जीवितमपि देव ! तादृशं तेषाम् ।
चम्पकशबलैर्बिसिनीकुसुमैरर्चन्ति सर्ववन्द्यं त्वाम् ॥५६॥

अकबन्धशिरसि युद्धे स्मरणेन तवाऽशिरःकबन्धबन्धेऽपि ।
कैटभरिपवो यथा नृपा विषमाविषमं न जानन्ति ॥५७॥

ममन्थ पिताभिमन्युरभिमन्युपिताऽपि तिरस्कृतस्तेन ।
मधुकरमेचक ! भवतश्चरणभ्रमरायितं येन ॥५८॥

तव पञ्चमचारित्रे न समो यमिनामहो ! यथाजातः ।
तपसा कृशतनुयष्टिरपि च कुदृष्टिः प्रभो ! पार्श्व ! ॥५९॥

करणिज्जाकरणीअं पेआपिज्जं च जे न वि मुणंति ।
ते दोस-दुइज्जा वि हु गुण-वीआ हुन्ति तइँ दिट्ठे ॥ ६० ॥

वेकक्ख-उत्तरीआ धवल-दुगूलोत्तरिज्ज-पिहिअ-मुहा ।
तुह कय-ण्हवणा घण-छाय-छत्त-छाहीओ माणन्ति ॥ ६१ ॥

इय सच्छाओ कइवाह-परिअणो कइअवं थुइं काउं ।
आइ-किडि व्व अभेडो जिण-ण्हवणे अह पयट्टो सो ॥ ६२ ॥

पल्लाणिअ-अपडायाणिअ-हयमाएहि अवर-राएहि ।
कणवीरच्चियकलसो हलिद्द-गोरो स किर दिट्ठो ॥ ६३ ॥

तेण जिणम्मि दुवालस-रवि-तेए मुहल-घण्ट-थोर-रवं ।
णंगलि-लंगलिभायर-सरिसेण पलोट्टिआ कलसा ॥ ६४ ॥

णंगूलि-णाहलत्तण-अपुण-भवत्थं निवेण करुणाए ।
लंगूलि-लाहला विं हु सित्ता जिण-ण्हवण-सलिलेण ॥ ६५ ॥

ससि-खण्ड-णडालाहिं समरी-भासाइ दूसिमिण-हरणं ।
सिविणे वि दुलहमणुजिणमकारि संगीयमित्थीहिं ॥ ६६ ॥

दढिआ सुनीविआहिं नीमीओ नच्चणीहिँ तक्कालं ।
सविसेस-सद्द-गीए सज्जाइ-कमोक्कम-पयट्टे ॥ ६७ ॥

तइआ वणिअ-सुसाहिं निव-सुण्हा-वल्लहाओं ता दिट्ठा ।
पाहाण-पुत्तिआहि व पासाण-त्थंभ-लग्गाहिं ॥ ६८ ॥

वंजिअ-दस-विह-धाऊ जणणी लास्स दह-विहस्सावि ।
दिवसे दिवहावगमे अ सुह-यरी वाइआ वीणा ॥ ६९ ॥

रंजिअ-नर-सिंघेणं वंसिअ-सीहेण वाइओ वंसो ।
दाघत्त-दाह-हरणो छुह-धवले जिण-गुणे गाउं ॥ ७० ॥

छमि-छत्तिवण्ण-गोरी छट्ठी भल्लि व्व पंच-वाणस्स ।
मय-छावच्छी वर-मुहर-गायणी गिण्हिउं तालं ॥ ७१ ॥

करणीयाकरेणीयं पेयापेयं च ये न जानन्ति ।
अतिदुष्टा अपि दृष्टे त्वयि जायन्ते विशिष्टगुणाः ॥६०॥

वैकक्ष्योत्तरवस्त्रा धौतक्षौमोत्तरीयधृतवदनाः ।
विहितस्नपना भवतश्छत्रच्छायां श्रयन्तीह ॥६१॥

इति सच्छायः कतिपयपरिवारः कतिपयां स्तुतिं कर्तुम् ।
आदिकिरिरिवाऽभीकः प्रावर्तत स जिनस्नपने ॥६२॥

पर्याणिततद्भिन्नैस्तुरगैर्नरपतिभिरागतैरितरैः ।
कणवीरार्चितकलशो दृष्टो गौरो हरिद्रांवत् ॥६३॥

अर्हति तेन द्वादशरवितेजसि मुखरघण्टघोररवम् ।
सोदरबलदेवानुजसदृशेन प्रवर्तिताः कलशाः ॥६४॥

तिर्यक्त्वम्लेच्छत्वापुनर्भवार्थं नृपेण किल कृपया ।
लाङ्गूलिलाहला अपि सिक्ता अर्हत्स्नपनसलिलैः ॥६५॥

शशिखण्डललाटाभिर्दुःस्वप्नहरं पुलिन्दभाषया स्त्रीभिः ।
अनुजिनमकारि गीतं स्वप्नेऽपि सुदुर्लभं स्फीतम् ॥६६॥

द्रढिताः सुनीविकाभिर्नीव्यस्तस्मिन् क्षणे सुनटिनीभिः
सविशेषशब्दगीते षड्जादिक्रमोत्क्रमस्फीते ॥६७॥

ता वाणिजरमणीभिर्नृपस्नुषावल्लभास्तदा दृष्टाः ।
पाषाणपुत्रिकाभिर्यथा हि तत्स्तम्भलग्नाभिः ॥६८॥

व्यञ्जितदशविधधातुर्जननी लास्यस्य दशविधस्याऽपि ।
दिवसे दिवसापगमे सौख्यकरी वादिता वीणा ॥६९॥

रञ्जितनरसिंहेन वांशिकसिंहेन वादितो वंशः ।
दाहार्तदाहहरणोऽमृतधवलान् जिनगुणान् गातुम् ॥७०॥

शमिसप्तपर्णगौरी षष्ठी भल्लीव पञ्चबाणस्य ।
मृगशावाक्षीवरमुखगायनी तालमाधाय ॥७१॥

अमय-छिरा-महुर-सरा अमय-सिरोवम-सराहि अणुगमिआ ।
जिण-गाणम्मि पयट्टा गुण-भायण-दाण-भाणं तो ॥ ७२ ॥

दणु-कुल-दणुअ-कुलाराइ-दुल्लहं तीइ रा-उल-विहारे ।
राय-उल-पियमवीअं गीअं सोउं न को आओ ॥ ७३ ॥

सक्कय-वारण-पाइअ-वायरण-पउत्त-सद्द-कय-गीए ।
आउज्जिअ-पायारे रंगे पुण आसि गुणि-पारो ॥ ७४ ॥

तत्थागओ अ कालायस-सम-कालास-अहिअ-हिअओ जो ।
सो केलि-किसलयासोअ-किसल-कोमल-हिओ आसि ॥ ७५ ॥

दुग्गावी-पा-वीढं दुग्गा-एवीस-पाय-वीढं च ।
मोत्तुं गण-गन्धव्वा तं गीअं सोउमोच्छरिया ॥ ७६ ॥

जिण-पाय-वडण-गुरु-पा-वडणाइं चइअ तत्थ उब्भ-जणो
पुलयंकुरेहि कलिओ उउम्बरो उम्बरेहिं व ॥ ७७ ॥

जाव निवो कय-पूओ आरत्तिय-मङ्गलं न जा कुणइ ।
ता देव-उले मरुवय-पूअं अणुसोइउं लग्गो ॥ ७८ ॥

मइ ताव देउलमिमं निम्मविअं सहल-जीविअमणेण ।
सव्व-रिउ-कुसुम-पूआ नो जइ जीअं न मे सहलं ॥ ७९ ॥

अह भणिअं खे सासण-देवीए एवमेव मा जूर ।
आवत्तमाण-जस तुममेमेअ किमत्तमाण-मणो ॥ ८० ॥

गुणि-पावारय-पारय दुह-अड-चिन्तावडेसु मा पडसु ।
होही तुह उज्जाणं सइ सव्व-रिऊहि कय-कुसुमं ॥ ८१ ॥

आरत्तियमह काउं मुक्क-मलो अपरिमुत्त-माउक्को ।
तव-सत्तं गुण-सक्कं माउत्त-निहिं गुरुं पणओ ॥ ८२ ॥

विंचुअ-डक्कोरग-दट्ठ-जीव-जीवाउ-चरण-रेणु-कणं ।
लुक्क-कलिं लुग्ग-भवं तं समुपासिअ गओ राया ॥ ८३ ॥

अमृतशिरा मधुकण्ठाऽप्यमृतशिरोपमलयाभिरनुगमिता ।
जिनगानेषु प्रवृत्ता गुणभाजनदानसत्पात्रम् ॥७२॥

तस्याः कुमारचैत्ये देवासुरदुर्लभं ततो वृत्तम् ।
हृद्यं प्रियं नृपाणां गीतं श्रोतुं न को ह्यागात् ? ॥७३॥

प्राकृतसंस्कृतशास्त्रप्रतिपादितशब्दसंग्रथितगीते ।
आतोद्यिकनिकुरम्बे रङ्गे गुणिमण्डलं चाऽऽसीत् ॥७४॥

तत्राऽऽगतश्च कालायससमतुल्यातिसिक्तहृदयोऽपि ।
केलिकिसलयाशोककिसलयकोमलमना आसीत् ॥७५॥

दुर्गाचरणप्रान्तं दुर्गादेवीशपादपीठं च ।
मुक्त्वा गणगन्धर्वास्तद् गीतं श्रोतुमायाताः ॥७६॥

जिनगुरुपादप्रणतिं त्यक्त्वा तत्रोर्ध्वलोक एवाऽऽसीत् ।
कलितः किल रोमाञ्चैर्जन्तुफलस्तत्फलैर्यद्वत् ॥७७॥

कृतपूजनृपो याव-दारात्रिकमङ्गलं न वा कुरुते ।
तावच्चैत्ये मरुबकपूजामनुशोचितुं लग्नः ॥७८॥

देवकुलं रचयित्वा विहितं जीवितमनेन मे सफलम् ।
सर्वर्त्तुकुसुमपूजा नो यदि सफलं न जीवितकम् ॥७९॥

अथ भणितं खे शासनदेव्या खिद्यस्व नो वृथा राजन् ।
आवर्तमानकीर्ते ! शङ्कामित्थं किमातनुषे ॥८०॥

गुणिजनपटप्रावारक ! संशयदुःखावटेषु मा पतत ।
भविताऽऽरामवनं ते सर्वर्तुगुणोल्लसितकुसुमम् ॥८१॥

आरात्रिकमथ कृत्वाऽऽवर्जवकलितो मुक्तमलो राजा ।
तपसि गुणेषु च शक्तं मार्दववन्तं गुरुं प्रणतः ॥८२॥

वृश्चिकभुजङ्गदष्टजीवजीवातुचरणरेणुकणम् ।
कलिभयहरणं देवं तं समुपास्य प्रभुर्व्रजितः ॥८३॥

लक्खण-पुण्णमखीणं अछीण-गमणं अझीण-तणुतेअं ।
खन्धाइ-सत्त-पिहुलं पोक्खर-गन्धं धुवावत्तं ॥ ८४ ॥

खन्दपिउ-कन्द-सरिसावणीस-जुग्गं असुक्क-रोम-छविं ।
अणसुक्ख-मउलि-कुसुमं खेडय-जर खेडअंग-रजं ॥ ८५ ॥

थाणु-पिया-जल-पुण्णं अखाणु-वायं जणेहि दीसन्तं ।
पडिखम्भअट्ट-थम्भय-थंभिअ-तणु-ठंभिअच्छेहिं ॥ ८६ ॥

रग्गं पिग-रत्त-सरं रवि-हय-सुक्कं व नील-किच्चि-छविं ।
सुंग-करणग्ग-चच्चर-चइत्त-ठिअ-दिट्ठि-दुच्चज्जं ॥ ८७ ॥

पच्चूहा पच्चूसं पि पंचधारासु अकयणिव्वेअं ।
णच्चा बुज्झा पिच्छीइ वण्णिअं सिक्ख-विज्जं ति ॥ ८८ ॥

विंचुअ-अहिविंछिअ-अच्छीविस-विस-हरण-छेत्त-सेअ-जलं ।
खुरताडण-अखम-छमं रिक्ख-पवंगेस-सम-वेगं ॥ ८९ ॥

अवि रिच्छ-सरिच्छेहिं सणिच्छयं सच्छणं च लोएहि ।
अच्छी-पच्छं लिच्छूहिं पेच्छिअं आसमारूढो ॥ ९० ॥

धवलगेहमइ-निच्चलाकिदी वच्छलो चुलुग-वंस-दीवओ ।
तच्च-देवय-वरेण तक्खणोसारिआखिल-दुहो पहुत्तओ ॥ ९१ ॥

लक्षणपूर्णं पूर्णमक्षीणगमनशरीरसम्पत्ति ।
स्कन्धादिसप्तपृथुलः पुष्करगन्धं ध्रुवावर्तम् ॥८४॥

श्रीकण्ठकार्तिकेयसमबलराजोचितं सुरोमाणम् ।
अत्यार्द्रमौलिकुसुमं विषतापविनाशि तनुरजसम् ॥८५॥

गङ्गाजलमिव पुण्यं रोगोज्झितमीक्ष्यमाणमपि लोकैः ।
दत्तान्यस्तम्भाट्टावष्टब्धमङ्गैरचलनेत्रैः ॥८६॥

रक्तं पिकरक्तकलं रविहयशुल्कं किमुन्नीतं नीलम् ।
मण्डपिकाग्रसमुज्ज्वलचैत्यस्थितदृष्टिसंलक्ष्यम् ॥८७॥

प्रतिप्रभातं पञ्चसु धारासु समासक्तमतिनिपुणम् ।
बुद्ध्वा भूमिजनेन वर्णितमिति शिक्षया विद्वान् ॥८८॥

वृश्चिकनेत्रभुजङ्गमविषहरणक्षेत्रजातघर्माम्बु ।
खुरघाताक्षमवसुधं सुग्रीवसमानबलवेगम् ॥८९॥

अपि ऋक्षेशसमानैर्लोकैः शुभनिश्चयं सदुत्साहम् ।
लिप्सुभिरक्षणः पथ्यमवलोकितमश्वमारूढः ॥९०॥

धवलगेहमतिनिश्चलाकृति-र्वत्सलश्चुलुकवंशदीपकः ।
तथ्यदैवतवरेण तत्क्षणो-त्सारिताखिलरुजो ययावसौ ॥९१॥

॥ इति द्वितीयः सर्गः ॥

# पाइयविन्नाणकहा

- आ.विजयकस्तूरसूरीश्वरा:

## ( १ )

## 'कम्मपरिणामो नन्नहा होई' इह भाविणी–कम्मरेहाणं कहा

**देविंदा दाणविंदा य, नरिंदा य महाबला ।**
**नेव कम्मपरीणामं, अण्णहा काउमीसरा ॥**

**मणोरम**नामनयरम्मि **रिउमद्दणो** नाम नरिंदो होत्था, तस्स पुत्तो न सिया, एगच्चिय **भाविणी** नाम कण्णा अत्थि, सा उ रण्णो पाणेहिंतो वि अहिगप्पिया । तओ सो राया पुत्तीए पुव्वं सिणाणपाणभोयणाइं कराविऊण पच्छा सयं सिणाणभोयणाइं कुणेइ । सा कण्णा कलायरियस्स समीवम्मि कलाओ सिक्खेइ । तत्थच्चिय नयरे निद्धणो **धणदत्तो** नाम सेट्ठी वसइ, तस्स सत्तपुत्ताणं उवरिं **कम्मरेहो** नाम अट्ठमो पुत्तो समुप्पण्णो, सो सव्वओ लहुत्तणेण पिउणो अच्चंतो पिओ अत्थि । सो वि पुत्तो तस्स च्चिय कलायरियस्स पासम्मि पढेइ ।

एगया अब्भसियसयलकलाए भाविणीए उवज्झाओ पुट्ठो 'भयवं ! मम भत्ता को होही ?' – एयं सोच्चा सो निमित्तवेई पसिणलग्गं पासिऊण कहेइ 'एसो कम्मरेहो तुम्ह वरो होहिइ ।' सा उवज्झायवयणं सुणिऊण वज्जाहया विव मुच्छिया होत्था । खणेण लद्धचेयणा चिंतेइ – 'एसो निद्धणस्स तणओ मम भत्ता भविस्सइ, अओ मरणं चेव वरं । परंतु जइ इमं कम्मरेहं हणावेमि तया सो मम भत्ता कहं हवेज्ज ?' एवं वियारिऊण सकोवा नियपासाए गया ! अंसुकिलिन्नगत्ता य चत्तसिणाणभोयणा सयणीए संठिया केण वि सद्धिं न वएइ ।

भोयणावसरे रण्णा 'भाविणी कत्थ गय' त्ति पुट्ठे गावेसिआ समाणा कोवघरंमि सयणीयसंठिया सा दिट्ठा । नरिंदेण ससिणेहं उच्छंगे ठविऊण कोवकारणं पुट्ठा । तइया तीए उवज्झाएण वुत्तं सव्वं कहिऊण अप्पणो निण्णओ वि कहिओ । एयं सोच्चा निवो मंतीणं पुरओ भाविणीए सरूवं निवेइऊण 'एत्थ मए किं कायव्वं' ति पुच्छेइ । मंतिणो कहेइरे – 'महाराय ! अवराहं विणा मणूसवहो न समुइओ, अओ कम्मरेहस्स पियरं आहविऊणं इच्छाइरेगधणं दाऊणं तं गिण्हेहि, पच्छा जहोइयं कुणेज्जाहि, एवं कुणमाणे तुम्हाणं अवजसो न होही ।' भूवई धणदत्तसेट्ठिं बोल्लाविऊण बहुधणप्पणेण कम्मरेहं मग्गेइ । सो धणदत्तो रण्णो वइरघायाओ

वि अइक्कढोरं वयणं सुणित्ता गलंतंसुनयणो वएइ – 'देव ! मम पुत्तो मम भज्जा अहं मम य सव्वपरिवारो वि तुम्हकेरो च्चिय णायव्वो, जहिच्छं च कुणसु ।' नरिंदो वि **वग्घत्तडीनाएण** संकडम्मि पडिओ, निरुवाओ कम्मरेहं आहवित्ता वहट्ठं चंडालाणं हत्थे देइ । ते चंडाला तं घेत्तूणं गामाओ बाहिरं सूलिगाइ समीवं समागया । तया अस्स कम्मरेहस्स पुण्णणुभावाओ संपत्तकरुणाभावा ते चिंतेइरे – बालहच्चा महापावकारणं सिया, अओ एसा न कायव्वा' इअ वियारिऊण अस्स ठाणे एगं मडगं सूलीए आरोविऊणं 'एत्थ कया वि पुणो नाऽऽगंतव्वं' ति कहित्ता तं कम्मरेहं मुंचित्था । सो वि कम्मरेहो रण्णो अहिवायं मुणंतो तओ सिग्घं निग्गच्छित्था ।

इओ य **सिरिपुर**नयरम्मि नामेण **सिरिदत्तो** सेट्ठि वसइ । तस्स सेट्ठिस्स **सिरिमई** नाम कण्णा आसि । एगया तस्स कुलदेवी मज्झरत्तीए आगंतूणं सुमिणम्मि सेट्ठिणो कहेइ – सेट्ठि ! इमस्स नयरस्स बाहिरं पच्चूसकाले उत्तरदिसाए अंबतरुणो हिट्ठम्मि सुत्तस्स बालगस्स पासम्मि तुम्हेच्चया किण्हा गावी चिट्ठिस्सइ, अस्स य बालगस्स तुं अप्पणो कण्णं दाहिसि त्ति ।

इओ य सो कम्मरेहो गामाओ गामं भमंतो तम्मि चेव दिणे, तीए चेव नयरीए समीवम्मि आगंतूण अंबतरुणो हिट्ठिम्मि पहपरिस्संतो सुविओ होत्था । पभायकालम्मि सो सिरिदत्तो सेट्ठी कुलदेवीदिण्ण-सुमिणाणुसारेण नयराओ बाहिरं आगओ समाणो तं कम्मरेहं तारिसं दट्ठूणं निअघरं आणेऊण तस्स निअकण्णं देइ । करग्गहणसमए य अपुत्तत्तणेण सव्वं लच्छि पि पदेइ । तम्मि नयरम्मि सो कम्मरेहो गुत्तनियनामो **रयणचंद** त्ति नामेण पसिद्धि संपत्तो । जोव्वणपत्तो सो रयणचंदो कयविक्कयकरणट्ठं ससुरस्स आणं घेत्तूणं पवहणमग्गेण अणेगदीवेसुं वावारं कुणंतो उवज्जियबहुधणो नियनयराभिमुहं आगच्छंतो भग्गपवहणो समुद्दमज्झम्मि पडिओ । तइआ दीहाउसत्तणेण एगेण महामच्छेण गसिओ । सो महामच्छो तस्स भारं वहिउं अचयंतो कमेण समुद्दतडम्मि समागओ, तइया सो एगेण धीवरेण गहिओ । फालियउयरमज्झाओ तं निग्गयं दट्ठूणं सो मच्छवहगो तं घेत्तूणं पुण्णजोगेण **भिगुपुरनरिंदस्स** उवहारे पयच्छेइ । सो भूवई अपुत्तत्तणेण तं पुत्तत्तणेण ठवेइ, कमेण य **कुंडणपुरनरिंद**स्स तणयं परिणावेइ ।

इओ य **रिउमद्दण**निवो पत्तजोव्वणाए **भाविणी**तणयाए निमित्तं सयंवरमंडवं रयावेइ । तत्थ अणेगनरिंदरायकुमार-मंति-मंतितणय-सेट्ठि-सेट्ठिपुत्त-सत्थवाहप्पमुहे आमंतिऊण आहवित्था । तइया भिउपुरनरिंदस्स रायपुत्तो **रयणचंदो** वि चउरंगसेणासहिओ तत्थ आगंतूण सयंवरमंडवं सोहावेसी । रायपुत्ती भाविणी सयलरायमंडलं अइक्कमिऊणं रोहिणी चंदं पिव रयणचंदं वरेइ । रिवुमद्दणनरिंदो ताणं विवाहलग्गं काऊणं करमोयणवेलाए गयतुरंगाइबहुदव्वं देइ, गमणट्ठं च अणुण्णं यच्छइ । सो रयणचंदो कुमारो भाविर्णी घेत्तूणं नियनयरं समागओ । एवं सो रयणचंदकुमारो पुव्वकयसुकयवसेणं संपत्तभिगुपुरज्जो ताहिं तीहिं भज्जाहिं सद्धिं पंचिंदियविसयसुहं भुंजमाणो सुहेण कालं गमेइ ।

एगया सो रयणचंदराओ सुवण्णथालगम्मि अईव साउअसुहासरिसं भोयणं भुंजेइ, तया पवणपबलत्तणेण भोयणभायणे पडंतरयरक्खणट्ठं समीवट्ठिआ भाविणी वत्थंचलेण भायणं ढंकेइ, तं तारिसं कज्जवावडं

पासिऊण सो रयणचंदनरिंदो चिंतिउं पउत्तो – 'अहो ! एगया एसा इत्थी मं सूलीए आरोवणट्ठं आदिसित्था, अज्ज एसा मं पाणप्पियं मण्णिऊण मज्झ सरीरम्मि भोयणे य पडंतिं धूलिं पि नेहाउरा निवारिउं इच्छेइ, अहो ! इमा केरिसिं अवत्थं पत्त' त्ति विम्हएण तेण हसिअं। सा भाविणी विम्हियं हसिरं च पियं दट्ठूणं वियारेइ – एयारिसं विम्हयहसणं मारिसीणं इत्थीणं सोहेइ, किंतु विणा कारणं हसणं पुरिसाणं न घडेइ, इत्थ कोई हेऊ सिया' इअ विआरिऊणं सनिब्बंधं नियपिययमं हसणकारणं पुच्छेसी । पियाए अच्चंतदुरग्गहवसेण सो नरिंदो कहेइ – 'सुंदरंगि ! पिये ! तुं मं अहिजाणेसि ?' सा वएइ – 'मज्झ तुं पाणप्पिओ सि, अहं तुम्ह पाणप्पिआ अम्हि' । राया कहेइ – 'मिगलोअणे ! पिययमे ! तुमए जो संबंधो कहिओ, सो उ जयम्मि पसिद्धो च्चिय परंतु अम्हाणं अण्णो वि संबंधो अत्थि, जं च तुं न याणेसि, अहं तं साहेमि – हे हरिणनयणे ! सो अहं कम्मरेहो धणदत्तसेट्ठिणो पुत्तो अम्हि। तुं उवज्झायसमीवम्मि मए सद्धिं कलाओ अब्भसंती भाविणी रायकण्णा सि' त्ति तेण पुव्वसव्वरहस्सं कहियं ।

तं च सोच्चा सा भाविणी अच्चांतलज्जानमिराणणा संजाया । तीए लज्जाावणयणट्ठं निवो कहेइ 'हे पिए ! भाविभावे अण्णहा काउं कोवि न चएज्जा । पुव्वनिबद्धसुहासुहकम्मजणियसंजोगविओगा जीवाणं हुंति, को तं विवरीअं काउं पक्कलो ?' 'अलाहि सोगेणं लज्जाए वा ।' एवं पियवयणं सुणिऊण लज्जं चिच्चा नियपिउणो सव्वं समायारं जाणाविऊणं कम्मगइगहणचिंतणपरा सा नियप्पियभत्तितल्लिच्छा पिएण सद्धिं माणुसभवोइअविसयसुहाइं भुंजमाणा सुहेण कालं अइक्कमेइ ।

अण्णहा कम्मरेहनरिंदो उज्जाणवालगमुहाओ गुरुसमागमणं नच्चा पभायकालम्मि निअभज्जा-परिवारसहिओ सव्विड्ढीए उज्जाणम्मि गंतूणं गुरुं वंदिऊण–

**जत्थ य विसयविरागो, कसायचाओ गुणेसु अणुरागो ।**
**किरिआसु अप्पमाओ, सो धम्मो सिवसुहो लोए ॥**

इच्चाइं गुरुवयणपंकयाओ निग्गयं देसणामयरसं सोच्चा संपत्तवेरग्गो चिंतेइ – 'इमम्मि भवम्मि कम्मस्स सुहासुहफलं पच्चक्खं दिट्ठं अणुभवियं च । तओ कम्मखयट्ठं उज्जमं कुणेमि' त्ति चिंतिऊण पुत्तस्स रज्जं दाऊण गुरुपासम्मि भाविणीपमुहभज्जासहिओ संजमं गिण्हित्था । सो रायरिसी उग्गतवसा किलिट्ठकम्माइं खविऊण सग्गं गओ, कमेण य सो सिद्धिं पाविहिइ । उवएसो –

**भाविणी–कम्मरेहाणं, कम्मफलपयंसिणिं ।**
**कहं सोच्चा पयट्टेज्जा, जयाय कम्मणो सइ ॥**

कम्मपरिणामम्मि भाविणी–कम्मरेहाणं कहा समत्ता ॥

१. श्वेतार्कतरुम् ॥

## (२)

## सोहणकज्जंमि भायरतिगस्स कहा

**सव्वसोहणकज्जेसुं, जीवाणं रक्खणं परं ।**
**बंधुतिगस्स दिट्ठंतो, णायव्वो एत्थ बोहगो ॥**

एगिम्मि नयरम्मि **सिरिमंतो** सेट्ठि परिवसइ । तस्स तिण्णि पुत्ता संति । एगया वुड्ढत्तणम्मि तेण नियदव्वस्स भागतिगं काऊणं पुत्ताणं दिण्णं । तस्स पासम्मि एगं महामुल्लं रयणं अत्थि । तस्स अप्पणे 'पुत्ताणं को धम्मिओ' त्ति जाणणट्ठं कहियं – 'जो सोहणं कज्जं कुणेज्जा, तस्स एयं रयणं दाहिस्सं' । एवं सोच्चा जेट्ठो पुत्तो अडसट्ठि तित्थजत्ताओ किच्चा तत्थ नियधणं वइऊण घरम्मि समागओ । पिउस्स वुत्तं – 'मए एयं सोहणं कज्जं कयं' । बीओ मज्झिमो पुत्तो गेहम्मि ठाऊणं दीणदुहिय-माहणाणं भोयणं दाउं पउत्तो । तेण वि कहियं – 'मए एवं सोहणं कज्जं कयं' ति ।

कणिट्ठपुत्तो 'सोहणं कज्जं किं' ति गवेसंतो एगया नयराओ बाहिरं गओ । तइआ तत्थ सरोवरम्मि पडियं बुडंतं जणं पासित्ता सिग्घयरं तत्थ गओ, जलम्मि पडिऊण तस्स उद्धरणट्ठं पयासं कुणेइ । 'अयं को अत्थि' त्ति वियारिऊणं तं पुरिसं सम्मं पासेइ – तेण णायं – 'इमो मम सत्तू वट्टइ' । एवं णच्चा वि बुडंतं तं रक्खेउं विचिंतेइ, कट्ठेण तं जलाओ बाहिरं निक्कासइ आसासेइ अ । सो वि सत्तू जीवियदाणाओ तस्स मित्तत्तणं संपत्तो । गेहम्मि आगंतूण पिउस्स पुरओ वुत्तं – 'अज्ज मए एयारिसं सोहणं कज्जं समायरिअं, जं सत्तू वि मज्जंतो जलाओ उद्धरिओ' । पिउणा वि तं सोच्चा सो बहुं अणुमोइओ । महामुल्लरयणं तस्स दाऊणं कहिअं – 'अवराहिजीवेसुं वि जो करुणाभावो, मच्चुमुहपडिआणं जीवाणं रक्खणं परत्थकरणं च तं चिअ सोहणं कज्जं सिया' । कणिट्ठपुत्तेण वि रयणविक्कएण जं दव्वं पत्तं, तस्स भागत्तयं काऊणं दुण्हं भाऊणं एगेगो भागो दिण्णो । पिआ वि तस्स तारिसपउत्तिं दट्ठूणं अईव संतुट्ठो । उवएसो –

**कणिट्ठभाउवुत्तंतं, सोच्चा पाणिसुहप्पयं ।**
**अवराहिजणेसुं पि, करुणं कुज्ज सव्वया ॥**

सोहणकज्जम्मि भायरतिगस्स कहा समत्ता ॥

**– गुज्जरभासाकहाए**

## (३)

## 'अत्थो अणत्थकारगो' इह धणदत्तस्स कहा

**धणलोहंधिया जीवा, न पेक्खंते हियाहियं ।**
**पिआपुत्ताण दिट्ठंतो, अच्छेरजणगो इह ॥**

आसि **नागपुरनयरम्मि धणदत्तो** नाम सेट्ठी, तस्स **धणवई** नाम भज्जा, **धणदेवो** य पुत्तो ।

पुव्वपावकम्मुदएण ते निद्धणा जाया । तओ ते पिआपुत्ता वावारट्ठं देसंतरम्मि गमणाय नियनयराओ निग्गया। गामाओ गामं भमंता अण्णया **कणयपुरनयरं** गंतुं इच्छमाणा रण्णम्मि संपत्ता । अरण्णम्मि रत्ती संजाया । तओ एगस्स वडतरुणो हिट्ठम्मि संठिआ । मज्झरत्तीए पुत्तो लहुसंकानिवारणट्ठं उट्ठाय जत्थ पसवणट्ठं उवविट्ठो, तत्थ सेयअक्कतरुं[१] पासिऊणं तेण विआरियं – 'विउसा कहिंति – सेयअक्करुक्खस्स हिट्ठम्मि अवस्सं निही होज्जा ।' तओ अणेण तस्स तरुस्स मूलं खणियं, तहिं निही दिट्ठो, तस्स मज्झम्मि दीणारा, तह य पहादिप्पंतो रयणमइओ एगो दिव्वहारो दिट्ठो । तिव्वधणलालसाविमूढेण तेण चिंतिअं – 'जइ पिउणो कहिस्सं तो सव्वं एयं एसो गिण्हिस्सइ, अओ जह कोवि न पेक्खिस्सइ तह एयं गिण्हिस्सं' एवं वियारित्ता निहिणोउवरिं धूलिं खिवित्ता तेण तं ठाणं सुववत्थियं कयं ।

इह तस्स पिआ जत्थ सुत्तो आसी, सो सहसा जग्गिओ समाणो पासम्मि पुत्तं अपासित्ता 'पुत्तो कत्थ गओ' त्ति विचिंतेइ । तओ चउसुं दिसासुं तेण दिट्ठिपाओ कओ, दूराओ आगच्छमाणो पुत्तो दिट्ठो । तया चेव कवडनिद्दं काऊण सुत्तो । पुत्तो वि आगंतूणं पिउणो पासम्मि सुविओ, खणंतरेण सो निद्दं पाविओ । तओ पिआ पत्तनिद्दं पुत्तं दट्ठूणं उट्ठिओ समाणो जाओ दिसाओ पुत्तो समागच्छंतो दिट्ठो आसि, तं दिसं पइ वच्चेइ, अग्गे गच्छंतो सो तं सेयअक्कतरुं पासिऊण तं ठाणं सम्मं निरिक्खेइ, तया अभिणवधूलिच्छण्णपएसं पासिऊण तेण वियारिअं – 'एईए भूमीए अब्भंतरम्मि किंपि होही' । तओ तं उक्खणिऊणं सो निही दिट्ठो, तइया किंपि विआरित्ता तं निहिं निक्कासित्ता अण्णहिं ठाणम्मि संठविअं ।' तओ आगंतूण पुत्तस्स समीवम्मि सो सुत्तो ।

पच्चूसकाले जागरमाणो पुत्तो निहिप्पएसं समागओ, निहिविरहिअं तं पएसं दट्ठूणं तेण चिंतिअं – 'पिउणा एसो निही गहिओ होज्जा' । तओ पिउस्स पासम्मि समागंतूण पुट्ठं – 'सो निही कत्थ ठविओ अत्थि ?' तेण कहियं – 'हं न याणामि' । एवं सोच्चा तेण पुणो वि भयं दंसिऊण पुट्ठं, तहवि तेण तहेव वुत्तं, पुणो वि दंडप्पहारं दाऊणं तेणं पुट्ठं, तह वि सो किंपि न वएइ । तइया अणाइकालनिविडपरिग्गहसण्ण-मुच्छिएण तिव्वधणलोहंधेण तेण गाढयरं दंडेण मत्थयम्मि पहरिओ समाणो जणगो उक्कडरोसक्कंतो गाढवेराणुबंधो मरणं लहिऊणं तत्थ च्चिय निहिप्पएसे **भुजंगमो** संजाओ ।

सो धणदेवो तं निहिं अलहमाणो घरम्मि गओ । माऊए पुट्ठं – 'तुम्ह पिआ कत्थ गओ ?' तेण वुत्तं – 'वावारट्ठं दूरदेसं गओ, अहं पच्छा समागओ' । एवं स कइदिणाइं जाव घरम्मि ठिओ । पुणो एगया निहिदंसणट्ठं तत्थ पएसे गओ, तेण तत्थ पियरजीवो सो भुजंगमो दिट्ठो । पुणरवि निहिमूढेण तेण सो वि सप्पो विहणिओ समाणो मरिऊण तम्मि एव ठाणम्मि **नउलो** जाओ । सो धणदेवो तत्थ निहिणो अदंसणेण पुणो पच्छा निवट्टिओ । कालंतरेण पुणो वि तत्थ गओ, तया सो नउलो पुव्वभवब्भासाओ तम्मि निहिम्मि आसत्तो तत्थ च्चिय ठिओ समाणो एगया निहिणो उवरिं ठिअं तं दिव्वहारं मुहेण घेत्तूण बाहिरं निग्गओ । धणदेवेण सो दिट्ठो । पुणो वि लट्ठीए तं हणिऊण तं निहिप्पएसं खणिउणं सो निहिं गहित्था ।

---

१. श्वेतार्कतरुम् ॥

अह सो हच्चातिगकारगो विम्हरिअकिच्चाकिच्चो निहिविमूढो तं घेत्तूणं भममाणो कमेण **कणयपुरनयरस्स** उज्जाणम्मि समागओ । तत्थ भविअजणाणं उवएसदाणपरं नाणत्तयसमण्णियं **मुणिचंदसूरिवरं** पासेइ । पासित्ता तस्स सूरिणो पहावेण उवसंतवेराणुभावो जाओ । तओ सो धणदेवो तस्स मुणिंदस्स पायपंकयाइं पणमेइ । सो सूरिवरो धम्मलाहं दाऊण ओहिनाणेएण तस्स सरूवं पासिऊण पडिबोहणट्ठं उवएसं पयच्छइ, जहा -

**अत्थं अणत्थं भावसु निच्चं, नत्थि तओ सुहलेसो सच्चं ।**
**पुत्ताओ वि धणीणं भीई, सव्वत्थेसा विहिआ रीई ॥**

एवं उवदिसित्ता - 'हे भद्द ! धणलोहंधलेण तुमए हच्चातिगकरणेण महापावं समज्जिअं । एवं सोच्चा संजाय-बहुअपच्छायावो वेरग्गमणो अप्पणो पावकम्मविणासणट्ठं पुच्छीअ - 'कहं हं एयाओ पावकम्माओ मुक्को होइस्सं ?' तया मुणिंदो सव्वपावपंकडहणसमत्थं सव्वविरइधम्मं उवदिसेइ । तओ जायसव्वविरइपरिणामो सो हारं विणा सव्वधणं सत्तखेत्तेसुं ववविऊण हारं च तन्नयराहिवइ**कणयचंदन**रिंदस्स समप्पेइ । तओ जिणिंदपडिमाओ अच्चिऊण दीणदुहिअणाहपमुहाणं च दाणं दाऊणं तस्स मुणिंदस्स पासम्मि पव्वइओ । सो कणयचंदनिवो तं हारं निय**कणयवईए** महिसीए समप्पेइ । सो धणदेवो मुणी गहणासेवणसिक्खं अब्भसंतो तिव्वतवस्साए किलिट्ठकम्मक्खयं समायरंतो आयरिएण सह गामाणुगामं विहरंतो कमेण गीयट्ठो संजाओ । एगया गुरुणो अणुण्णं घेत्तूणं तस्स च्चेव नयरस्स उज्जाणम्मि समागंतूण सो एगागी पडिमं पडिवण्णो काउस्सग्गेण संठिओ आसि ।

इओ य तस्स पिउणो जीवो नउलभवम्मि मरिऊण **सवलिग**[१]त्तणेण समुप्पण्णो । एगया आहारट्ठं इओ तओ भममाणीए तीए सवलिगाए सो मुणिवरो दिट्ठो । पुव्वभवब्भासवसेण मुणिस्स उवरिं जायरोसा तस्स हणणत्थं उवायं गवेसंती सा सवलिगा नरिंदस्स पासाए समागया । तइया रायमहिसी तं हारं निक्कासिऊण सिणाणं कुणेइ । सा सवलिगा तं हारं चंचूए घेत्तूणं मुणिणो कंठम्मि मुंचित्था । कम्मस्स सुहासुहफलं जाणंतो सो मुणी समभावेण संठिओ । इह सिणाणंतरम्मि रायमहिसी तं हारं अपासिऊण पोक्कारेइ । रायपुरिसा तत्थ समागया समाणा पोक्कारकारणं नच्चा हारं गवेसेइरे । नरिंदस्स वि कहेइरे । रण्णा हारगवेसणट्ठं सव्वत्थ सुहडा पेसिआ । ताणं केवि सुहडा उज्जाणमज्झम्मि आगया । तया मुणिस्स कंठम्मि हारं दट्ठूणं मुणिं पुच्छंति । अवयंतं तं ते सुहडा चोरं मण्णिऊण विविहताडणप्पयारेहिं ताडेइरे । समभावभावियप्पा सो मुणिवरो नियकम्मफलं जाणमाणो समभावेण सव्वं तं सहंतो अज्झप्पविसोहीए ओहिनाणं संपत्तो । तइया उज्जाणवासिणी काई देवी तग्गुणरंजिआ सव्वे सुहडे थंभित्था ।

एयं समायारं जाणिऊण नरिंदो सिग्घं तत्थ उज्जाणे समागओ । 'अस्स महप्पणो एसो पहावो' त्ति णच्चा मुणिवरपायंबुयाइं पणमित्ता नियावराहे खमावेइ । तइया सो मुणिंदो आह - 'तुम्हाणं एसो न दोसो, किंतु मम पुव्वबद्धकम्मस्स एयं फलं' । एवं सोच्चा नरिंदो पुच्छेइ - 'हे मुणिंद ! तुम्हाणं कंठम्मि एसो

---

१. 'समडी' इति भाषायाम् ॥

हारो कहं समागओ ?' तया सो मुणी तरुवरसाहासंठिअं तं सवलियं दंसिऊण सव्वं वुत्तंतं कहेइ – 'एसा सवलिगा पुव्वचउत्थभवम्मि मज्झ पिआ होत्था, धणविमूढेण मए हओ पिआ भुजंगमो जाओ। सो वि दव्वमूढो निहिट्ठाणट्ठिओ एगया निहिदंसणट्ठं तत्थ गएण मए हणिओ। सो य तत्थच्चिय पएसम्मि नउलत्तणेण समुप्पण्णो। तत्थ वि पुणो मए हओ। एसो नउलो मरिऊण एत्थ सवलिगा संजाया।

एगया एसा भममाणी पडिमासंठिअं इह मं पासिऊण जायतिव्वरोसा हंतुं वियारंती तव महिसीए हारं घेत्तूणं मज्झ कंठम्मि मुइत्था। हारं गवेसमाणेहिं तुम्ह सुहडेहिं मम कंठम्मि तं दट्ठूणं उवसग्गिओ हं समभावेणं सव्वं सहंतो ओहिनाणं संपत्तो। तओ तुम्ह उज्जाणवासिणी मम गुणाणुरागिणी देवी एए सुहडे थंभित्था'।

एवं वुत्तंतं सोच्चा कणयचंदनरिंदो तं मुणिवरं पुणो पुणो खमावेइ। उज्जाणदेवीए ते सुहडा विमुक्का समाणा मुणिपाए पणमेइरे। सा सवलिगा मुणिंदमुहाओ निअं वुत्तंतं सोच्चा जाईसरणेण य पुव्वभवं नच्चा जायपच्छायावा नियावराहखमावणट्ठं मुणिणो समीवम्मि समागंतूण नयणगलियंसू तं मुणिं पणमिअ नियावराहं खमावेई। सो धणदेवो मुणी धम्मुवएसदाणेण तं पडिबोहेइ। पडिबुद्धा सा नियदुक्कडं गरिहंती चत्तभत्तपाणा य अणसणेण कालधम्मं पाविऊण **देवलोगं** उवगया। उज्जाणवासिणी देवी वि सम्मद्दंसणं संपत्ता। कणयचंदराया वि ससम्मत्तं देसविरइव्वयं अंगीकुणेइ। ते सुहडा वि पडिबुद्धा। तओ सो धणदेवो मुणी तत्तो विहरिऊण अणेगभव्वजीवे पडिबोहेऊण नियाउपज्जंते अणसणेण देहं चइत्ता सग्गं गओ कमेण सिद्धिसुहं पाविहिइ।

**उवएसो –**

**अत्थं अणेगदुक्खोह-हेउं नच्चा धरिज्जहि।**
**सया सव्वहिं संतोसं, भवसायरतारणं॥**

**'अत्थो अणत्थकारगो' इह धणदत्तस्स कहा समत्ता॥**

**– गुज्जरभासाकहाए**

## (४)
## दोहग्गदोसम्मि माहणकुडुंबस्स कहा

**दोहग्गदूसिआ जे ते, इट्ठलाहं लहेज्ज न।**
**मायपियरपुत्ताण, रम्ममिह नियंसणं॥**

एगम्मि नयरम्मि **सिवदासो** नाम बंभणो होत्था, तस्स भज्जा **सिवदासी,** पुत्तो य **सिवदत्तो** नाम आसि। ते तिण्णि वि दालिद्दुक्खपीलिआ भिक्खणट्ठं नयरे भममाणा वि दोहग्गदोसेणं किमवि न लहेइरे। परिहाणवत्थं तु दूरे, उयरपूरणं पि न जायए। कट्ठेण दिणाइं गमिंति। निब्भग्गदोसेण लोगा वि ताणं संमुहं न पासेइरे।

अणुकंपाभावं पि न कुणंति । घरंगणम्मि समागयाणं ताणं [1] साणुव्व निक्कासेइरे । पए पए अक्कोसवयणेहिं अवमाणं कुणेइरे । एवं ते सव्वत्थ अवमाणं लहमाणा तत्थ य जीविउं अचयमाणा नयराओ गंतुं इच्छंति ।

एगया सो सिवदासो भज्जाइ पुत्तेण य सहिओ नियनराओ निग्गओ । कमेण भमंतो सो रण्णम्मि आगओ । तत्थ अंब-लिंब-ताल-तमालाइ-विविहतरुगणमंडियं समीववट्टिनईए उवसोहिअं उज्जाणं पासेइ । तस्स मज्झम्मि एगं सिवालयं पासिऊण एवं वियारेइ – 'रमणिज्जं इमं ठाणं, तरुगणा वि बहुफलभरभरिआ अईव सुंदरा संति । इह सप्पहावो सिवदेवो दीसइ । तओ दालिद्दावत्थाए इह वसणं जुत्तं । अण्णं च एयस्स सिवदेवस्स आराहणेण कयावि दालिद्दुहं पि नासिहिइ' । तओ ते तिण्णिवि तत्थ वसिऊण सिवस्स पुरओ तवं काउं विलग्गा । एगया तत्थ एगो अंधो वणिओ इओ तओ लट्ठीए आहारेण [2] चक्कमंतो तत्थ समागओ । ताणं पुरओ नियदुक्खं कहिऊण सो वि तत्थ सिवमंदिरे सिवदेवं आराहिउं पसत्तो ।

एवं चऊसु वि तवं कुणंतेसु कइदिणाणंतरं ताणं चउण्हं उवरिं सिवदेवो पसण्णो संजाओ, इट्ठवरं च मग्गिउं कहेइ । तइया तिण्णि चिंतेइरे 'किं मग्गियव्वं' ? किं रज्जं मग्गेमि ? अप्पाउसाणं रज्जेणं किं ? जइ धणं तया तंपि को हरेज्जा, तओ तेण किं ? जइ दीहाउसं मग्गिज्जइ, तइआ निद्धणावत्थाए तेण किं ?' एवं चिंतिऊण ते वयंति – हियाहियं विआरिऊण समए मग्गिस्सामु त्ति, अहुणा वरो तुम्हाणं पासे चिट्ठउ' ।

एवं नियदोहग्गदोसोदएण ते तिण्णि वि सिवदेवे पसण्णे वि किंपि न मग्गेइरे ।

सो अंधो वणिओ वियारेइ – 'पसण्णे देवे को पमायं कुणेज्जा ?' एवं चिंतिऊण निम्मलबुद्धी सो इक्कवक्केण एवं मग्गेइ – 'सुवण्णकलसीए तक्कं कुणंतिं पासायस्स बिइयमालगे वासिणिं नियमज्झमपुत्तवहुं नयणेहिं पासेमि' त्ति । तस्स बुद्धीए पसण्णो होऊण सिवदेवो 'तहेव सिया' इअ वएऊण अदंसणीहूओ । अणेण वणिएण एयाओ वयणाओ तिण्णि पुत्ता, तिण्णि पुत्तवहूओ, अप्पणो भज्जा, सुवण्णकलसीए सामिद्धी, तिमालगो पासाओ, गोधणं, पुत्तवहुदंसणेण नियनयणा वि मग्गिआ । माहणाईहिं दोहग्गदोसेण तीसु वरेसु वि एक्को वि वरो न पाविओ । सो वणिओ लद्धवरो निम्मलनेत्ताइं लद्धूणं नियनयरम्मि य समागंतूण वावारं काउं विलग्गो । तत्थ किंचि लद्धधणो अण्णदीवगमणट्ठं कयाणगाइं पवहणेसु भरिऊणं समुद्दम्मि निग्गओ । अणेगदीवेसुं कयविक्कयं कुणंतो एगया उदहिमज्झत्थिअसुण्णदीवम्मि समागओ ।

तत्थ एगाए पीढिगाए उवरिं पासाणनिम्मियं जंतमइअं आसारूढं जणं पासेइ । सो दाहिणभुयाचालणेण तहिं आगच्छमाणे जणे निवारेइ । तेण एयम्मि दीवम्मि मरणभएण के वि न आगच्छेइरे । सो वणिअओ सिवदेववरेण निब्भओ संतो तत्थ आगंतूणं आसारोहं पासेइ । तस्स हिट्ठम्मि लिहिअ-अक्खरपंतीओ वाएइ । तत्थ एवं लिहिअं – 'जो सीसं छिंदेज्जा सो धणं पावेज्जा ।' सो एवं वाइऊण एवं निच्चयं कुणेइ – 'एसो आसारोहो हत्थचालणेण आगच्छंते जणे निवारेइ । जो मत्थयं छिंदेज्जा सो दव्वं लहेज्जा अणेण नज्जइ – एसो जंतमइओ आसारोहो अत्थि, अओ अंतो विवरं होही । जओ जंतपयोगेण हत्थं चालेइ । सीसच्छेदणक्खरेण

---

१. श्वानवत् । २. भ्राम्यन् ।

वियाणिज्जइ – अस्स च्चिअ आसारोहस्स सीसं छेयणीअं अण्णहा इह आगओ जणो नियसीसच्छेदणेण कहं धणं पावेज्जा? एवं मणंसि निण्णयं किच्चा सो असिणा आसारोहस्स सीसं छिंदेइ। तओ सो पासाणमइओ आसो अवसरिओ। तत्थ य विवरं दट्ठूणं अब्भंतरम्मि सो पविट्ठो।

तेण तहिं कोडिसंखं धणं दिट्ठं, वियारिअं च – 'सिवदेवप्पहावेण मए एयं लद्धं'। सव्वं तं धणं पवहणम्मि आरोविऊण 'अलं वावारेण' त्ति चिंतिऊण नियनयरे समागओ। एवं सो वणिओ सिवदेववरेण महासमिद्धिमंतो नयरजणमाणणीओ य संजाओ। कास वि धणिअस्स कण्णआ वि तेण परिणीआ। कमेण तिण्णि पुत्ता जाया। तस्स गेहम्मि पुत्तवहूओ वि समागया। तओ वसणट्ठं मालगत्तयभूसियो पासाओ निम्मविओ। बहुआइं गोधणाइं पि संचिणिआइं। एवं सो सिवदेवदिण्णवरप्पहावेण तिमालगस्स पासायस्स बीअमालगमज्झभागे सुवण्णकलसीए तक्कं कुणंतिं मज्झमपुत्तवहुं पासेइ। पासिऊण नियमइविहवेण पत्थिअसिवदेस्स किवाए य सव्वं लद्धं ति नियमइं पसंसेइ। एवं सो वणिओ सिवदेवकिवाए सुही जाओ।

एगया सो विआरेइ – 'मए एगवरेण सव्वं एरिसं लद्धं तया तेण माहणेण तीहिं वरेहिं कियंतं लद्धं होही ?' ताणं सरूवदंसणट्ठं बहवो सिरिमंता माहणा आहविआ। सव्वे अ ते भोयणवत्थाईहिं सक्कारिआ सम्माणिआ य। तह वि ते न दिट्ठा। तओ अण्णनयरम्मि माहणमित्तस्स गवेसणट्ठं नियपुरिसा वि पेसिआ। तह वि तस्स सुद्धी न लद्धा।

इओ अ सो माहणो तस्स य भज्जा पुत्तो अ सिवदेववरं लद्धूण 'किं मग्गियव्वं' ति वियारंता दोहग्गदोसेण किंपि इट्ठं अपासमाणा तओ निगग्च्छिऊण भिक्खावित्तीए आजीविगं कुणंता गामाओ गामं अडमाणा छमासपज्जंते एगम्मि नयरे समागया। तत्थ एगस्स वडरुक्खस्स हिट्ठम्मि निवासो विहिओ। माहणो तस्स य पुत्तो भिक्खणत्थं नयरम्मि निग्गया। तइआ गामम्मि महूसवपसंगो होत्था। तेण सव्वाओ इत्थीओ विहूसिअसब्वंगीओ गीयगाणं कुणंतीओ महूसवसुहं अणुहवंतीओ विहरंति। सा माहणी तारिसीओ तीओ दट्ठूणं तीए वि वत्थाभूसणभूसिअसुंदररूवजोव्वणजुत्तसुंदरीभवणिच्छा जाया। मणदुब्बलत्तणेण विम्हरिअपइनेहाए तीए सिवदेवो पत्थिओ – 'हे सिव ! तुमए पुव्वं वरेण दिण्णेण अहुणा वसणालंकार-भूसियंगी सोलसवारिसिई[1] सुंदरी हं होज्जा'। तक्खणं तेण देवेण मग्गियाणुसारेण सव्वजुवईवुंदाओ वि सुंदरंगी सुंदरी कया।

तया तस्स नयरस्स नरिंदो संतेउरो नयरीसोहादंसणट्ठं निग्गओ होत्था। सो तत्थ आगओ समाणो तं सुंदरिं पासिऊणं तीए रूवम्मि अच्चंतासत्तो जाओ। सा वि तं पेक्खित्ता 'नियरूवजोग्गो एसो' इअ विआरिऊण तम्मि नेहवई जाया। तीए विआरिअं च – एयस्स नरिंदस्स महिसी भवामि तइआ सोहणं होज्जा'। ताणं दिट्ठी परुप्परं मिलिआ। मयणपरवसीभूओ निवो तं कहेइ – 'जइ तुमं मं अभिलसेसि तया मए सद्धिं आगच्छसु'। सा वि नरिंदरूवविमूढा तेण सह चलेइ। राया तं अंतेउरम्मि नेऊण महिसीपए ठवेइ।

---

१. षोडशवार्षिकी ॥

इओ माहणो तस्स य पुत्तो वडतरुसमीवम्मि समागया समाणा माहणिं अपासिऊण समीवत्थिए जणे पुच्छेइरे। ते कहिंति – 'इह वडतरुहिट्ठट्ठिआ नारी जा भिक्खुगीसरिसी होत्था, सा अकम्हा दिव्वरूवा संजाया। सा एत्थ आगएण नरिंदेण सद्धिं गया'। तेण माहणेण चिंतिअं – 'नूणं सिवदेवदिण्णवरपहावेण सा एरिसी जाया'। तओ कुद्धो माहणो सिणाणं काऊणं सिवदेवं पत्थेइ – 'सिवदेव ! मम भट्ठसीला भज्जा जाया, तओ सा अहुणा तुमए दिण्णेण वरेण छाली होज्जा' ति। माहणपत्थणाणंतरं अंतेउरे संठिआ सा माहणी बक्करी भूआ। नरिंदो वक्करीरुवं तं दट्ठूणं भयतसिओ निअसुहडे वएइ –'किल एसा डागिणी अत्थि। मज्झ पाणविणासणट्ठं आगया सिया'। तओ नूणं एयं तीए थाणम्मि पेसेज्जा। एसा सागिणी पिसाइणी वा का वि इमा होज्जा, एणं मा तासेह'। तओ रायसुहडा तं घेत्तूणं वडतरुणो हिट्ठम्मि मोत्तूणं पच्चागया।

सो माहणो तस्स य पुत्तो तं बक्करीं पच्चभिजाणेइरे। सा वि ओसण्णहियया संजायपच्छायावा पियं पुत्तं च पासेइ। माहणेण चिंतिअं – 'एसा सिवदेवाओ वरं मग्गिऊणं सुंदरी होऊण नरिंदगेहम्मि गया। तओ बक्करीरूवेण सइ अत्थु। एसा एयस्स दंडस्स अरिहा चिअ' त्ति निण्णेऊण तं घेत्तूणं सपुत्तो माहणो नयराओ निग्गओ। सा उ तिरिअभावेण दुहिया माणुसभावं इच्छंती दीणयाभरियदिट्ठीए पियं पुत्तं च पेक्खंती अप्पाणं धिक्कारिंती अग्गओ चलेइ। सो माहणो मग्गपरिस्समेण संपत्तगिलाणभावं मंदं मंदं च चलंतिं च तं दंडेण तालितो कट्ठेण चलावेइ।

एगया अरण्णम्मि हिंसगपाणिगणेहिं पराभविज्जमाणिं तं पासिऊण 'कहं एयं रक्खिस्सं' ति चिंततो किंचिसंजायकरुणो सो माहणो नियपुत्तं वएइ – 'हे पुत्त ! इमा बक्करी तुव जणणी अत्थि। ईईए महंतो अवराहो कओ तह वि एसा अणुकंपारिहा। तओ तुमं सिवदेवदिण्णवरं मग्गिऊण पुणो माणुसीभावं संपाडेसु'। विणीअपुत्तो जणणीभत्तीभरनमिरो सो सिग्घं सिणाणं किच्चा सिवदेवं मणंसि काऊणं पत्थेइ – 'सिवदेव ! मम माया जारिसी पुव्वं आसि तारिसी होज्जा'। तओ सिवदेवेण पुव्वं पिव सा माणुसीभावं पाविआ। लद्धनियरूवा सा माहणी नियपिययमस्स पुरओ नियावराहं खमावेइ।

एवं सिवदेवदिण्णवरदाणत्तयं पि निप्फलं गमाविऊण ते माहणाइणो तिण्णि वि नियदोहग्गं निंदेइरे। पहम्मि गच्छंतो माहणो चिंतेइ – 'मम मित्तस्स वणिअस्स सिवदेववरदाणेण केरिसी ठिई होही ? जइ सो सुहियो भविस्सइ तया सो अवस्सं मम सहेज्जं कुणेज्जा' एवं चिंतिऊण मित्तस्स गामं अभिगच्छेइ। कमेण सो मित्तस्स गामम्मि समागओ। मित्तस्स सव्वं सामिद्धिं पासिऊण वियारेइ – 'एएण मित्तेण एगेण वरेण नयणेहिं सद्धिं सव्वं एरिसं एस्सरिअं लद्धं' ति मणंसि तं पसंसेइ। लद्धवरदाणतिगो य सो दोहग्गवंतं नियअप्पाणं निंदेइ। सो वाणिअओ मित्तस्स उवगारं सुमरंतो तं माहणिं च माहणपुत्तं च वसणाहारधणेहिं सक्कारेइ सम्माणेइ य। वएइ य – 'मए सिवदेवपुरओ जारिसं मग्गिअं तारिसं पावियं। तं जहा–सिवदेवस्स किवाए भज्जा, पुत्ता य तिण्णि, मालगत्तयभूसिओ पासाओ, पुत्तवहूओ, गावीओ लोयणा वि पाविआ'।

एवं सोच्चा सो माहणो बहुखिण्णमाणसो वि वणिअस्स किवाए सुही संजाओ। दोहग्गदोसपीलिआणं दुहं चिय होइ। **उवएसो-**

**लद्धसिवपसाया वि, निद्धणमाहणाइणो।**
**जारिसा तारिसा जाया, तओ पुण्णज्जणं कुण॥**

दोहग्गदोसम्मि माहणकुडुंबस्स कहा समत्ता॥

**- गुज्जरभासाकहाए**



अद्य भवान् यत् सुकृतं करोति
तत् श्वः विस्मरिष्यते
तथाऽपि सुकृतं करोतु !
यद् भवान् आ बहुवर्षेभ्यो विरचयति
तत् कश्चन क्षणेनैव विनाशयिष्यति
तथाऽपि तत् रचयतु ।
यतः
प्रान्ते भवान् अनुभविष्यति यत्
तत् ( सुकृतं )
भवतस्तेषां च मध्ये नैव
कदाचनाऽऽसीत्
परन्तु
तत्
भवतो भगवतश्च मध्ये समासीत्
अतः
सुकृतं करोत्वविरतम् !!!

Kirit Graphics : 09898490091